वदिव्यानांकल्पानांयुद्धकौशलं वाक्यजातिविशेषाश्चलोकयात्राक्रमश्चयः ६९ यच्चापिसर्वगंवस्तुतच्चैवप्रतिपादितं पंतले
क्कःकश्चिदेतस्मिन्भुविविद्यते॥ ७० ॥ ॥ ॥ ॥ ॥

स्तुतिनिंदान्यापदेशादयोवापरकृत्यादिरूपार्थवादभेदावालोकयात्राक्रमोनीतिशास्त्रं ६९ ॥ ७० ॥ ७० ॥ ७० ॥ ७० ॥ ७० ॥

मुनिसंचयात् मुनिसमूहात् विशिष्टात्कुलेनः ७१ गां वाचं ब्रह्मवादिनीं वेदवादिनीं ७२ विशेषणे अतिशायने ७३ ७४ यतः यत्र देशे ७६ ७७ ७८ अबुद्ध्वा अर्थमिति शेषः
ॐमित्यंगीकारे ७९ ग्रंथग्रंथिं ग्रंथे दुर्भेद्यस्थानं ८० ८१ श्लोककूटं श्लोके गुप्तार्थत्वमर्थित्वेऽपि । अर्थान्तरव्यवसायकत्वमित्यर्थः अर्थस्य श्लेषमेव स्यगूढत्वात् । प्रश्रितस्य प्रश्रयेण वक्रस्य

वि
ब्रह्मो च तपोविशिष्टादपि वैशिष्टान्मुनिसंचयात् मन्ये श्रेष्ठतरं त्वां वै रहस्यज्ञानवेदनात् ७१ जन्मप्रभृति सत्यां ते वेद्मि गां ब्रह्मवा-
दिनीं त्वया च काव्यमित्युक्तं तस्मात्काव्यं भविष्यति ७२ अस्य काव्यस्य कवयो न समर्था विशेषणे विशेषणे गृहस्थस्य शेषास्त्रय इवाश्र-
माः ७३ काव्यस्य लेखनार्थाय गणेशः स्मर्यतां मुने सौतिरुवाच एवमाभाष्य तं ब्रह्मा जगाम स्वं निवेशनं ७४ ततः सस्मार हेरंबं
व्यासः सत्यवतीसुतः स्मृतमात्रो गणेशानो भक्तचिंतितपूरकः ७५ तत्राजगाम विघ्नेशो वेदव्यासो यतः स्थितः पूजितश्चोपविष्टश्च व्यासे-
नोक्तस्तदानघः ७६ लेखको भारतस्यास्य भव त्वं गणनायक मयैव प्रोच्यमानस्य मनसा कल्पितस्य च ७७ श्रुत्वैतत्प्राह विघ्नेशो य-
दि मे लेखनी क्षणं लिखतो नावतिष्ठेत तदा स्यां लेखको ह्यहं ७८ व्यासोऽप्युवाच तं देवमबुद्ध्वा मा लिख क्वचित् ओमित्युक्त्वा गणे-
शोऽपि बभूव किल लेखकः ७९ ग्रंथग्रंथिं तदा चक्रे मुनिर्गूढं कुतूहलात् यस्मिन् प्रतिज्ञया प्राह मुनिर्द्वैपायनस्त्विदं ८० अ-
ष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च अहं वेद्मि शुको वेत्ति [illegible] संजयो वेत्ति वा न वा ८१ तच्छ्लोककूटमद्यापि ग्रथि-
तं सुदृढं मुने भेत्तुं न शक्यतेऽर्थस्य गूढत्वात्प्रश्रितस्य च ८२ सर्वज्ञोऽपि गणेशो यत्क्षणमास्ते विचारयन् तावच्चकार व्यासोऽपि श्लोकानन्या-
न्बहूनपि ॥ ८३ ॥ श्रीरामाय नमः ॥ ॥ ॥ ॥ ॥ छ ॥

सार्थं प्रश्रितं शब्दभ्रमाणां तत्स्याप्यपि गौरपादिह त्रिभेदेन गूढत्वं यथा मस्यः स्वच्छन्दः निमिषति ८२ यत्पदस्य यावत् ॥ ८३ ॥ ॥ ॥ ॥ ॥

कारकमिति ज्ञानमेवलोकिपापांकिपाथ्यामिति शलाकाभिर्नेत्रोन्मीलनं कर्तृमित्यर्थः एतत्प्रकाशनं कृतमिति निरंतरीयेनान्वयः ८५ ८० प्रकाशनं विकसनं ८६ ८७ विटंकाः पक्षुपवेशनानि कपो
तपालिकादिविटंकः पुंनपुंसकमित्यमरः ८८ सारो मज्जा ८९ विश्रामं स्थापमिति विश्रामः छाया ९० आमेति। आश्रमवासिकहेडिलः मौशलादिग्रंथः ९ स्कंतिस्थानीयांशो वांतः ९१

अज्ञानतिमिरांधस्य लोकस्य तु विचेष्टतः ज्ञानांजनशलाकाभिर्नेत्रोन्मीलनकारकं ८४ धर्मार्थकाममोक्षार्थैः समासव्यासकीर्तनैः तथा
भारतसूर्येण नृणां विनिहतं तमः ८५ पुराणपूर्णचंद्रेण श्रुतिज्योत्स्नाः प्रकाशिताः नृबुद्धिकैरवाणां च कृतमेतत्प्रकाशनं ८६ इति
हासप्रदीपेन मोहावरणघातिना लोकगर्भगृहं कृत्स्नं यथावत्संप्रकाशितं ८७ संग्रहाध्यायबीजो वै पौलोमास्तीकमूलवान् संभव
स्कंधविस्तारः सभारण्यविटंकवान् ८८ आरणीपर्वरूपाढ्यो विराटोद्योगसारवान् भीष्मपर्वमहाशाखो द्रोणपर्वपलाशवान् ८९
कर्णपर्वसितैः पुष्पैः शल्यपर्वसुगंधिभिः स्त्रीपर्वैषीकविश्रामः शांतिपर्वमहाफलः ९० अश्वमेधामृतरसस्त्वाश्रमस्थानसंश्रयः मौस
लश्रुतिसंक्षेपः शिष्टद्विजनिषेवितः ९१ सर्वेषां कविमुख्यानामुपजीव्यो भविष्यति पर्जन्य इव भूतानामक्षयो भारतद्रुमः ॥ ९२
सूमउ च तस्य वृक्षस्य वक्ष्यामि शश्वत्पुष्पफलोदयं स्वादुमेध्यरसोपेतमछेद्यममरैरपि ॥ ९३ ॥ ॥ ॥ ॥

९३ पुष्पं धर्मः फलं मोक्षः तद्रूपस्यास्वं पुष्पं हि फलं वा वः सश्वमिति श्रुतेः अत एव क्रमात् स्वादु च अछेद्यं च ९३ ॥ ० ॥ ० ॥ ० ॥ ७७

भारतस्य प्रभवं प्रोक्तवानाह । मातुरिति । मातुः सत्यवत्याः गाङ्गेयस्य भीष्मस्य च नियोगात् तन्नत्वकामतः क्षेत्रे स्त्रियां विचित्रवीर्यस्य कालेन धृतराष्ट्रादीन् जनयामास ९४ ९५ तेषु धृतराष्ट्रादिषु जातेषु पुत्रपौत्रादिरूपेण प्रादुर्भूतेषु । वृद्धेषु राज्यभागिषु पुत्रपौत्रादीनां राज्यार्थिनां परमां गतिं स्वर्गं गतेषु ९६ ९७ शशास सत्वमेतान् भारतं श्रावयेत्याज्ञापितवान् ९८ कर्मान्त

मातुर्नियोगाद्धर्मात्मा गाङ्गेयस्य च धीमतः क्षेत्रे विचित्रवीर्यस्य कृष्णद्वैपायनः पुरा त्रीनग्नीनिव कौरव्याञ्जनयामास वीर्यवान् ९४ उत्पाद्य धृतराष्ट्रं च पाण्डुं विदुरमेव च जगाम तपसे धीमान्पुनरेवाश्रमं प्रति ९५ तेषु जातेषु वृद्धेषु गतेषु परमां गतिं अब्रवीद्भारतं लोके मानुषेऽस्मिन्महानृषिः ९६ जनमेजयेन पृष्टः सन्ब्राह्मणैश्च सहस्रशः शशास शिष्यमासीनं वैशंपायनमन्तिके ९७ स सदस्यैः सहासीनं श्रावयामास भारतं कर्मान्तरेषु यज्ञस्य चोद्यमानः पुनः पुनः ९८ विस्तरं कुरुवंशस्य गान्धार्या धर्मशीलतां क्षत्तुः प्रज्ञां धृतिं कुन्त्याः सम्यग्द्वैपायनोऽब्रवीत् ९९ वासुदेवस्य माहात्म्यं पाण्डवानां च सत्यतां दुर्वृत्तं धार्तराष्ट्राणामुक्तवान्भगवानृषिः १०० चतुर्विंशतिसाहस्रीं चक्रे भारतसंहितां उपाख्यानैर्विना तावद्भारतं प्रोच्यते बुधैः १ ततोऽध्यर्धशतं भूयः संक्षेपं कृतवानृषिः अनुक्रमणिकाध्यायं वृत्तान्तानां सपर्वणां २ इदं द्वैपायनः पूर्वं पुत्रमध्यापयच्छुकं ततोऽन्येभ्योऽनुरूपेभ्यः शिष्येभ्यः प्रददौ विभुः ३ षष्टिं शतसहस्राणि चकारान्यां स संहितां । त्रिंशच्छतसहस्रं च देवलोके प्रतिष्ठितं ४ पित्र्ये पञ्चदश प्रोक्तं गन्धर्वेषु चतुर्दश एकं शतसहस्रं तु मानुषेषु प्रतिष्ठितं ५ नारदोऽश्रावयद्देवानसितो देवलः पितॄन् ॥ ॥ ॥ ॥एम

रेषु कर्मच्छिद्रेषु ९९ क्षत्तुर्विदुरस्य धार्तराष्ट्राणां दुर्योधनादीनां १०० तावत्तावत्संख्याकं १ अध्यर्धशतं सार्धशतं २ शुकग्रहणं तत्सदृशायेवं देयमिति ज्ञापनार्थं ३ षष्टिं शतसहस्राणि षष्टिलक्षाणि श्लोकाः ४ ५ ॥श्रीरामाय नमः॥ ॥ ॥ ॥ ॥ ॥

६ अस्मिन्निति सम्पाठ्यमानं वैशंपायनेनोक्तं निबोधत। अर्थतो बुद्ध्यध्वं ७ इदानीं भारततात्पर्यसंग्राहकौ द्वौ श्लोकौ पठति। दुर्योधन इति मन्युः क्रोधः तेन द्वेषेर्ष्यासूयादिकमपि ग्राह्यं तन्म-
यो महानत्युच्छ्रितो द्रुमः दुर्योधनः तेन महत्त्वमुन्नतत्वमैक्यं प्राप्ताः कर्णशकुनिदुःशासनास्तस्य स्कंधशाखापुष्पादित्वेनोक्ताः धृतराष्ट्रस्तस्य मूलं राजा धृतराष्ट्रः सच अमनीषी मनोनिग्रहा-
समर्थः तेनैव हि पुत्रस्नेहान्धेन द्यूतावसरे दुर्योधनो दृढमूलो भवत्। अन्यथा वास्य एव विदुरेण हितवचसा तस्य त्यागे कृते सति निर्गुणः स्यात् इदानीं द्रोणदीक्षितग्रहणादिमूलः कुलक्षयो न जातः स्यात्।
एतेन द्वेषाज्ञानमूलो मन्युतरुः क्रोधलोभादिस्कंधो हिंसास्तेयादिशाखो वधबंधनादिफलो पुरुषार्थकामेन मूलाज्ञानच्छेदेन नाशनीय इति सूचितं। मन्युः पुमान्क्रुधि दैन्ये शोके च यज्ञे
वेति मेदिनीकोशः ८ युधिष्ठिर इति धर्मः पुण्यं तेन तत्कारणीभूतशमदमसत्याहिंसादिकं ग्राह्यं तन्मयो महाद्रुमः युधिष्ठिरः तदेकात्मानो ऽर्जुनभीममाद्रेयास्तस्य स्कंधादिरूपत्वादित्याह

गंधर्वयक्षरक्षांसि श्रावयामास वै शुकः अस्मिंस्तु मानुषे लोके वैशंपायन उक्तवान् शिष्यो व्यासस्य धर्मात्मा सर्ववेदविदां वरः ७ दु-
र्योधनो मन्युमयो महाद्रुमः स्कंधः कर्णः शकुनिस्तस्य शाखाः दुःशासनः फलपुष्पे समृद्धे मूलं राजा धृतराष्ट्रोऽमनीषी ८ युधि-
ष्ठिरो धर्ममयो महाद्रुमः स्कंधोऽर्जुनो भीमसेनोऽस्य शाखाः माद्रीसुतौ पुष्पफले समृद्धे मूलं कृष्णो ब्रह्म च ब्राह्मणाश्च ९ ॥ ॥

कृष्ण एव तस्य मूलं कृष्णः शुद्धसत्त्वमयज्ञानविग्रहः परमात्मा तेन हि दृढं ज्ञानेन धर्मो दृढमूलो भवेत् अन्यथा कामादिभिरुपहतः स्यात्। येषामेतदक्षरं गार्गि अविदित्वास्मिँल्लोके यज-
ति ददाति तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवतीति श्रुतेः ज्ञानस्य मूलं ब्रह्म वेदः वेदाद्धि योगकत्वाख्यपरापरधर्मज्ञानं जायते धर्मस्य शब्दमूलत्वादिति न्यायात्। वेद-
स्यापि मूलं ब्राह्मणास्तत्संप्रदायप्रवर्तककत्वात्। एवं ब्राह्मणानामुपदेष्टृत्वेन वेदस्य प्रमाणत्वेन। परमात्मनो ऽनुग्राहकत्वेन च धर्ममूलत्वं। एतेन वेदब्राह्मणभक्तेन संगृह्यमाणो
वेदोक्तयागादिधर्मवृक्षो हिंसामसत्यादिस्कंधो धारणाध्यानादिशाखस्तत्साक्षात्कारफलः पुरुषार्थकामेन भगवदाराधनत्वेन यादनीय इति सूचितमात्मनिर्णीयोगादिति सू-
चोक्तस्यैव सत्त्रभूतस्य श्लोकत्रयस्य व्याख्येयोऽध्यायशेषः तत्र दुर्योधनस्य मन्युमयत्वादिकं युधिष्ठिरस्य धर्ममयत्वादिकं च व्याख्यायते॥ ९ ॥ श्रीरामचंद्राय नमः॥ एम:

आ० १८

पा०१ ६२

पांडुर्जित्वेत्यादि १० मृगव्यवायनिधनात् मृगरूपिणः ऋषेर्व्यवायनिधनं मैथुनकाले मारणं तस्माद्धेतोः कृच्छ्रां कष्टां आपदं प्रजोत्पत्तिप्रतिबंधकत्वमपि व्यवायकाले मरिष्यसीति शापं प्राप। तत्र आपदि एवं सत्यामपि पार्थानां पांडवानां जन्मप्रभृति जातकर्मसंस्कारः प्रभृतिशब्दार्थः तत्र आचारविधिः क्रमः शुभशीलरक्षा स्वाम्यादिविशेषः ११ नचैतत् द्रूपं विरुद्धमित्याह। मात्रोरिति। च शब्दो हेतौ। यस्मात् धर्मोपनिषदं प्रति धर्मः कुंत्या ऋषिणा उपदिष्टस्य मंत्रस्यार्थे विशिष्टः उमानप्रार्थनीय रूपेण स्वरूपः आसन् तस्मादिति विरोधः पत्नीवत्त्वविचित्रवी

पांडुर्जित्वा बहून्देशान्युद्धा विक्रमणेन च अरण्ये मृगयाशीलो न्यवसत्समुनिभिः सह १० मृगव्यवायनिधनात्कृच्छ्रां प्राप स आपदं जन्मप्रभृति पार्थानां तत्राचारविधिक्रमः ११ मात्रोरभ्युपपत्तिश्च धर्मोपनिषदं प्रति धर्मस्य वायोः शक्रस्य देवयोश्च तथाश्विनोः १२ तापसैः सह संवृद्धा मातृभ्यां परिरक्षिताः मेध्यारण्येषु पुण्येषु महतामाश्रमेषु च १३ ऋषिभिर्यत्तदानीता धार्तराष्ट्रान्प्रति स्वयं शिशवश्चाभिरूपाश्च जटिला ब्रह्मचारिणः १४ पुत्राश्च भ्रातरश्चेमे शिष्याश्च सुहृदश्च वः पांडवा एत इत्युक्त्वा मुनयोऽन्तर्हितास्ततः १५ तांस्तैर्निवेदितान्दृष्ट्वा पांडवान्कौरवास्तदा शिष्टाश्च वर्णाः पौरा ये ते हर्षाच्चुक्रुशुर्भृशं॥ १६ ॥ ॥ ॥ ॥राम

यत्कल्माषपादादिराजदोषप्रवृत्तः तत्प्रसंगेन कृतार्थत्वं नियतत्वं विप्रसादत्वा विधानं आवर्तितां प्रतिप्रसीदय मदीनाम् मंत्रो मातरौ इति अभ्युपपत्तिः रेतःसेकार्थं गमनं उपपत्तं तस्मात्स साम पित्रा पादयि पांडोः पुत्र जन्मादिकं न विरुद्धमित्यर्थः १२ अत्र मातृभ्यामिति सतेनेत पितृमरणं सूच्यते १३ ऋषिभिरिति यत्तदा संबंधहानिरार्षत्वात् अन्वयः तदा धार्तराष्ट्रान् प्रति स्वयमेव ऋषिभिरानीता इत्यर्थः १४ पुत्राश्चेत्यादि शतपुत्रादीन्प्रति यथायोग्यं योज्यं। पांडवाः पांडोः पुत्रा एते १५ ॥ ॥ ॥ ॥ राम

रामः० १८

न तस्यैत इति पित्र्ये कृत्या अस्य दारमृतत्वात् । न तस्यैत इति माद्र्योः सतीत्वात् अतिदुष्टा नामुक्तिपरेति विरमृतः चिरं शापदग्धः अस्य कालान्तरे शिशव इति संदेहबीजं यद्वा चिरं कृतो दोषः कामेनेति शे
षः विप्रशापात् । अत एव संछिन्नलिङ्गे मत्स्येदी सप्तजिते स्यादिति भिदिनो । यद्वा अन्तत्वसमये मीति अन्तो पापबीयमत्र लिङ्गाहत्तं ब्रह्मचर्यादिभिः संततिहान १७ स्वागतं शोभनमागमनं पुष्पाकं
यतो वयं दिष्ट्या भाग्येन यत् पाण्डोः संततिं पश्याम इति पौरेरुक्ते स्वागतं सम्यगागमनम् अस्माभिः पुष्पान्वितं इति उच्यतां वदतां पाण्डवानामपि वाचो अश्रूयन्त सर्वशः सर्वैः १८ संदिग्धानां संदेहापनो

पुछ

ऊचुः केचित्तवैतेन तस्यैत इति चापरे यदा चिरमृतः पाण्डुः कथं तस्येति चापरे १७ स्वागतं सर्वथा दिष्ट्या पाण्डोः पश्याम संततिं उच्यतां वाग
तमिति वाचो अश्रूयन्त सर्वशः १८ तस्मिन्नुपरते शब्दे दिशः सर्वा विनादयन् अन्तर्हितानां भूतानां निःस्वनस्तुमुलोऽभवत् १९ पुष्पवृ
ष्टिः शुभा गन्धाः शङ्खदुन्दुभिनिःस्वनाः आसन्प्रवेशे पार्थानां तदद्भुतमिवाभवत् २० तत्प्रीत्या चैव सर्वेषां पौराणां हर्षसंभवः शब्द आसीन्महां
स्तत्र दिवस्पृक्कीर्तिवर्धनः २१ ते अधीत्य निखिलान्वेदाञ्शास्त्राणि विविधानि च न्यवसन्पाण्डवास्तत्र पूजिता अकुतोभयाः २२ युधिष्ठिरस्य शौचेन
प्रीताः प्रकृतयोऽभवन् धृत्या च भीमसेनस्य विक्रमेणार्जुनस्य च २३ ॥ ॥ ॥ ॥ ॥ राम

दकं यदा देववचः इतः माहात्म्यं तस्मिन्निति । निःस्वनः निष्ठितः स्वनः पाण्डवागत इत्येवंरूपः शब्दः १९ अद्भुतं दिव्यपुष्पवृष्ट्यादि अन्यत्रादृष्टं २० तत्प्रीत्या तेषु पाण्डवेषु ये पौराः हर्षस्य संभवः सा
धुशब्दः दिवः स्पृक् स्वर्गस्पृक् २१ अकुतोभयाः निर्भयाः २२ शौचेनेति आचारपरिहार्यसंसर्गश्चाप्यनिन्दितैः आचारे च व्यवस्थानं शौचमित्यभिधीयते । शीलेनेति पाठे शीलमप्य
तदेव । इष्टानिष्टार्थसंपन्नो चित्तस्याविकृतिः धृतिः सर्वातिशयसामर्थ्यं विक्रमं परिचक्षते २३ ॥ श्रीरामाय नमः ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ श्री वासुदेवाय नमः ॥ ॥

श्या० १९

वृत्तावृत्तिः शुश्रूषा क्षांतिरागस्य विक्रिया जितेंद्रियत्वं विनयो यथावानुद्धतशीलता । शोपैमिथ्यवमापः स्याद्गुलिनो पियरामवे २४ समवायेसमाजे भर्त्रीरिंखपमेवहूणाने इति मर्त्र खर्पवरां । कर्मच्छशोभखे
नोपरिस्थसभ्रमतो मस्यस्यवेधनं २५ घृग्मः समरे युद्धः षेङ्कोपि चाभवदिस्यन्वयः २६ पार्थिवान एकैकमः गणान संधीमूता स्वजित्वा । आजहार संयादिनान् २७ गुणैः क्लिगात्म
धनाजाप्याश्चद्याादिभिः २८ जरासंधं भीमेनचैघं शिशुपालं कृष्णेनचघातपित्वायुधिष्ठिरे गणाजसूयः आयद्रतिपूर्वेणसंबंधः १९ अर्हणानि । उपायनानि मणयो विघर्गणादि हरादियोपला

गुरुशुश्रूषयाकुंत्यायमयोर्विनयेनच ततोषलोकः सकलस्तेषांशौर्यगुणेनच २४ समवायेततोराज्ञांकन्यांभर्त्रेस्वयंवरां प्राप्तवानर्जुनः कृष्णां
कृत्वाकर्मसुदुष्करं २५ ततः प्रभतिलोकेस्मिन्पूज्यः सर्वधनुष्मतां आदित्यस्वक्षः प्रेक्ष्यः समरेष्वपिचाभवत् २६ सपर्वान्पार्थिवानजित्वा
सर्वांश्चमहतोगणान् आजहारार्जुनोराज्ञोराजसूयमहाक्रतं २७ अन्नवान्दक्षिणावांश्चसर्वैः समुदितोगुणैः युधिष्ठिरेणसंप्राप्तोराज
सूयोमहाक्रतुः २८ सुनयाद्वासुदेवस्यभीमार्जुनबलेनच घातयित्वाजरासंधंचेद्यंचबलगर्वितं २९ दुर्योधनंसमागच्छन्नर्हणानि
ततस्ततः मणिकांचनरत्नानिगोहस्त्यश्वधनानिच ३० विचित्राणिचवासांसिप्रावारावरणानिच कंबलाजिनरत्नानिरांकवास्तरणानिच ३१

रत्नानिवज्रवैदूर्यादीनि ३० प्रावारा उपरिवस्त्राणि । आवरणानि परिधानीयानि । उपहृतवासः शब्देनैव तेषां ग्रहणात् प्रावरणानि शिबिराणि । आवरणानि जवनिकाः कंबलरत्नानि अतिरत्नानि
चकंबलादिषु सुत्कृष्टानि जातौ जातौ यदुत्कृष्टं तद्रत्नमिति कोशात् रांकवास्तरणानि रंकुः पशुविशेषः तल्लोमजानि पट्टकूलान्यास्तरणानि ३१ ॥ श्रीरामायनमः ॥ श्रीरामचंद्रायनमः ॥ ९

राम० १९

(c) Dharmarth Trust. Digitized By eGangotri

ईर्ष्यापरो सर्षामिहिम्मत्वं । नडुल्लोभमत्सः क्रोधः समहानपावर्द्दहभावी ३२ सकृतां गुणपकृतां ३३ अनभिज्ञानवत्यासीगावदहसितः जलं स्थलमम्मानस्यं जलमधमानमहरंशुग्मेमावद
स्कंदनसवलना । किं कुर्वेषु संभ्रमं भ्रमिपं त्रैद्यापेवः ३४ हरिगाः पांडुरः पांडुरिसमः ३५ ततः पुत्रकोशर्यादिज्ञातानंतरं सतः प्रियः ततधर्मप्रियः ३६ नातीति । पंचतविहितत्वमोदतयद्यात

त्रिवभ्रमादि २

समहृद्वांतां तथा दृष्ट्वा यां स्वानां तद्दाश्रियं ईर्ष्याः समस्थः सुमहांजस्पमन्म्फरजायत ३२ विमानप्रतिमां तत्रमयेनसकृतां सभां पांडवानामुप
हृतां सदृष्ट्वायप्यतप्यत ३३ तत्रावहसितस्वासीत्स्कंदन्निव संभ्रमात प्रसहंतासदेवस्मभीमेनानभिज्ञानवत ३४ सभोगान विविधान्सुंजन्त
त्नानिविविधानि च । कथितोधृतराष्ट्रस्य विवर्णो हरिणः कृशः ३५ अन्वजानात्ततोद्यूतं धृतराष्ट्रः सुतप्रियः तच्छ्रुत्वा वासुदेवस्य कोपः सम
भवन्महान् ३६ नातिप्रीतमनाश्चासीद्विवादांश्चाप्यमोदत द्यूतादीननयान्घोरान्विविधांश्चाप्युपेक्षत ३७ निरस्य विदुरं भीष्मं द्रोणं शा
रद्वतं कृपं । विग्रहेतमलेतस्मिन्दहन्क्षत्रं यथासरं ३८ जयत्सु पांडुपुत्रेषु श्रुत्वा सुमहदप्रियं दुर्योधनमतं ज्ञात्वा कर्णस्य शकुनेस्तथा ३९
धृतराष्ट्रश्चिरं ध्यात्वा संजयं वाक्यमब्रवीत शृणु संजय सर्वं मे न वा मूयितुमर्हसि ४० ॥ ॥ ॥ ॥ ॥१

यान्युपेक्षत तत्र हेतुः दहन्क्षत्रं परस्परमिति उत्तरेण संबंधः हेमोशता । क्षत्रस्य दाहस्य ये समर्थाः दुष्टसंहारार्थत्वात्तद्वनारास ३७ निरस्य अवगणय्य प्रवृत्ते मत्ती तिशेषः ३८ दुर्योधनमतं ज्ञात्वा पीम
सुवीक्षनततरास्याहं दियमिति ३९ मे धर्षितो मे असूयितुम्मदीयं वचनं वक्तुमर्हसि पितुमार्हसि ४० ॥ ॥ ० ॥ ० ॥ ०॥ ०॥०॥

रत्नमर्थमनुस्मृत्य । ॥

तत्र हेतुः श्रुतवान[illegible]सीति श्रुतवानधीती बुद्धिमान् तया ऽतो ऽर्थे तत्र ग्रंथधारकः मेधावी ऊहापोहकुशलः अत एव प्राज्ञानां पांडवानां संमतः न च भीयेनैव भीतिमानस्मि ४१ अचक्षुः कार्पण्यात् श्राध्येन दीनत्वात [illegible] पुत्रप्रीत्या च तत्सहामि सहे। अचेतनं अल्पबुद्धिं ४३ सभायामारोहणोत् दर्शनेन च ४४ अमर्षणः अशांतः निरुत्साहो मृदितिशेषः स्वाभिप्रायं शोभनाश्रीर्यस्य तपधिष्टिं। संप्रासंवशीकर्त्तुं योगं तरे स्पष्टोर्थः ४५ गांधारराजः शकुनिं। तत्र तस्मिन् द्यूते मंत्रिते सति एवं यश्चायद्यज्ज्ञातं नयाशाचतिरोधकं न स्वमिलोकहृदयं हि तज्ज्ञानाभावे पि मूढाः

श्रुतवानस्मि मेधावी बुद्धिमान्प्राज्ञसंमतः न विग्रहे मम मतिर्न चापि कुलक्षये ४१ न मे विशेषः पुत्रेषु स्वेषु पांडुसुतेषु वा इहं मामभ्यसूयंति पुत्रा मन्युपरायणाः ४२ अहं त्वचक्षुः कार्पण्यात्पुत्रप्रीत्या सहामि तत् मुह्यंतं चानुमुह्यामि दुर्योधनमचेतनं ४३ राजसूये श्रियं दृष्ट्वा पांडवस्य महौजसः तच्चावहसनं प्राप्य सभारोहणदर्शने ४४ अमर्षणः स्वयं जेतुमशक्तः पांडवान्रणे निरुत्साहश्च संप्राप्तां सुश्रियं क्षत्रियोपि सन् ४५ गांधारराजसहितश्छद्मद्यूतममंत्रयत् तत्र यद्यद्यथाज्ञातं मया संजय तच्छृणु ४६ श्रुत्वा तु मम वाक्यानि बुद्धियुक्तानि तत्त्वतः ततो ज्ञास्यसि मां सौते प्रज्ञाचक्षुषमित्युत ४७ ॥ ० ॥ ० ॥ ० ॥ ० ॥ ० ॥

लौकिकवृत्तार्थस्मृतिमात्रेण [illegible] स्वात्मानं तत्त्वं तीधृतराष्ट्रोक्तिव्याजेन दर्शयति। श्रुत्वेति। केचित्तु प्रज्ञाचक्षुषमिति विशेषणादनागतार्थकथनं धृतराष्ट्रेण क्रियते यदाश्रौषमित्यादिनेत्याहुस्तत्र अश्रौषमिति भूतार्थलिङ्प्रयोगो नुपपन्नः ४७ ॥ श्रीरामाय नमः ॥ श्रीरामचंद्राय नमः ॥ श्रीकालभैरवाय नमः ॥ श्रीवागीश्वराय नमः ॥ श्रीशंकराभ्यो नमः ॥ श्रीअन्नपूर्णाभ्यो नमः

सहृद्रूपिकेन चित्ते भिन्नेन स्थालीपुलाकन्यायेन परमार्थस्य निश्चितेनाकृतानाऽपि बलवता महद्वैसंगं न कुर्वीतेत्यन्तरा कृत्स्नजयाशाविच्छेदकेषु अनेकेषु निमित्तेषु दृष्टेष्वपि तान्न जहौ अहो मोहस्यामा
हात्म्यमिति वर्णयन् तत्र श्लोकार्थं च संगृह्णन् यदाश्रौषं धनुरित्यादिभिः सप्तषष्ट्या श्लोकैः प्रत्येकं प्रत्येकं मामानं ताननाइस लक्ष्यं पातितं तत्र वदु पदेन प्रतिज्ञानस्वात विजयाय । विजयाशीत
दानंदारम्य । नाशंसे आशां न करोमि १ माधवीं मधुवंशजां प्रसह्य पूतनमभिमां अस्मिवीरौ रामकृष्णौ महसयाप्येये नसौहार्देन तौ न तत्र का अस्माकं जयशेतिभावः २ प्रवृष्टं वर्षणोत्र

यदाश्रौषं धनुरायम्य चित्रं विद्धं लक्ष्यं पातितं वै पृथिव्यां कृष्णां हृतां प्रेक्षतां सर्वराज्ञां तदा नाशंसे विजयाय संजय १ यदाश्रौषं द्वारकायां सुभ
द्रां प्रसह्योढां माधवीमर्जुनेन इंद्रप्रस्थं वृष्णिवीरौ च यातौ तदा नाशंसे विजयाय संजय २ यदाश्रौषं देवराजं प्रवृष्टं शरैर्दिव्यैर्वारितं चार्जुनेन
अग्निं तदा तर्पितं खांडवे च तदा नाशंसे विजयाय संजय ३ यदाश्रौषं जातुषाद्वेश्मनस्तान्पार्थान्पंच कुशलान्मातृसमेतान् युक्तं चैषां विदुरं स्वार्थसिद्धौ
तदा ४ यदाश्रौषं द्रौपदीं रंगमध्ये लक्ष्यं भित्वा निर्जितामर्जुनेन शूरान्पांचालान्पांडवेयांश्च युक्तांस्तदा ५ यदाश्रौषं मागधानां वरिष्ठं जरा
संधं क्षत्रमध्ये ज्वलंतं दोर्भ्यां हतं भीमसेनेन गत्वा तदा ६ ॥ ॥ ॥ ॥ ॥

वृत्तं कर्त्तरिक्तः ३ जातुषात् लाक्षामयात् विदुरं चैषां यांस्वनां स्वार्थसिद्धौ युक्तं यदाश्रौषं ४ केवलानश्च अस्माकमजेयाः पांडवाः किंमुत पांचालैरतिभूरैः समेता इति भावः ५ ज्वलंतं
भासमानं दोर्भ्यामेव न शस्त्रेण ६ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥राम॥ ॥

प्रसह्यदेहैर्नैवनतमेदाहिना ७ यद्रौपदीयतिव्रताकोपानयांडवानांक्रोधाद्वनशाजपाशेसर्थं ८ यवासर्सांश्चविंसमहिमस्वातद्रौपद्याः नास्माकंजयः कितवः शाकुनिकोधूर्त्तः ९ अद्भुतवस्त्रां
पाशवसाघृतक्रीडायां। सौबलेनशकुनिनाअन्वागतंअनुगत १० चेष्टाः बाहुवांकुशाद्याः ब्राह्मणानयुद्धादपितियामेवजयइत्याह। यदाश्रौषंस्नातकानमितिद्वाभ्यांस्नातकाः समापित

यदाश्रौषंदिग्जयेपांडुपुत्रैर्वशीकृतानभूमिपालान्प्रसह्य महाक्रतुंराजसूयंकृतंचतदा ७ यदाश्रौषंद्रौपदीमश्रुकंठींसभांनीतांदुःखिता
मेकवस्त्रां रजस्वलांनाथवतीमनाथवत्तदा ८ यदाश्रौषंवाससांतत्रराशिंसमाक्षिपत्कितवोमंदबुद्धिः दुःशासनोगतवान्नैवचांतंतदा ९
यदाश्रौषंहृतराज्यंयुधिष्ठिरंपराजितंसौबलेनाक्षवत्यांअन्वागतंभ्रातृभिरप्रमेयैस्तदा १० यदाश्रौषंविविधास्तत्रचेष्टाधर्मात्मनांप्रस्थितानां
वनाय ज्येष्ठप्रीत्याक्लिश्यतांपांडवानांतदा ११ यदाश्रौषंस्नातकानांसहस्रैरन्वागतंधर्मराजंवनस्थं भिक्षाभुजांब्राह्मणानांमहात्मनांतदा १२ य
दाश्रौषमर्जुनंदेवदेवंकिरातरूपंत्र्यंबकंतोष्ययुद्धे अवाप्तवंतंपाशुपतंमहास्त्रंतदा १३ यदाश्रौषंत्रिदिवेपार्थमेकंशक्रात्साक्षाद्दि
व्यमस्त्रंयथावत् अधीयानंशंसितंसत्यसंधंतदा १४ यदाश्रौषंकालकेयास्ततस्तेपौलोमानोवरदानाच्चदृप्ताः देवैरजेयानिर्जिताश्चार्जुनेनतदा
दा १५ यदाश्रौषमसुराणां[illegible]वधार्थेकिरीटिनंयांतममित्रकर्षणं कृतार्थंचाप्यागतंशक्रलोकात्तदा ॥ १६ ॥ ॥ ॥

विद्याव्रताः १२ यदाश्रौषमर्जुनमित्यादिचतमिरर्जुनस्यामानुषीशक्तिर्दर्शिता १३ शंसितंप्रशस्यंसत्यसंधं। अवितथव्रतिनं १४ १५ १६ ॥ ॥राम

प्रति२

१७ यदाश्रौषं घोषेति। वल्कलधारिभ्यः पांडवेभ्यः स्वैश्वर्यं प्रकाशयितुं वत्सांकनव्याजेन घोषयात्रागतानां धार्तराष्ट्राणां येभ्यस्तत्ता वृद्धाः तेषामपि जेतृत्वमस्त तां जेतुं शक्ता इत्यर्थः १८ धर्मान्वयहा
दर्पितेषामेव जयप्रत्याशयेति १९ कृष्णयाद्रौपद्या वेदने पुनर्द्वादशवर्षाणि वनवासमत्वयोदशे प्रच्छन्नचर्येति ज्ञानात् २० विराटराष्ट्रे गोग्रहे २१ मत्स्यराज्ञा विराटेन सममासांतविधेरनित्य

ध्या४ सभागतं धर्म२

यदाश्रौषं वैश्रवणेन सार्द्धं समागतं भीममन्यांश्च पार्थान् तस्मिन्देशे मानुषाणाम गम्येन १७ यदाश्रौषं घोषयात्रागतानां बंधं गंधर्वैर्मोक्षणं चा
र्जुनेन स्वेषां सुतानां कर्णबुद्धौ रतानां तद १८ यदाश्रौषं यक्षरूपेण धर्मं राज्ञेन सूत प्रश्नान्कांश्चिद्विब्रुवाणं च सम्यक्तदा १९ यदाश्रौषं न वि
दुर्मामकास्तान्प्रच्छन्नरूपान्वसतः पांडवेयान् विराटराष्ट्रे सहकृष्णेपातांस्तदा २० यदाश्रौषं मामकानां वरिष्टान् धनंजयेनैकरथेन भग्नान्
विराटराष्ट्रे वसतां महात्मनां तदा २१ यदाश्रौषं सत्कृतां मत्स्यराजसुतां दत्तां उत्तरामर्जुनाय तां चार्जुनः प्रत्यगृह्णात्सुतार्थे तदा २२ यदाश्रौ
षं निर्जितस्याधनस्य प्रव्राजितस्य स्वजनात्प्रच्युतस्य अक्षौहिणीः सप्त युधिष्ठिरस्य तदा २३ यदाश्रौषं माधवं वासुदेवं सर्वात्मना पांडवार्थे निवि
ष्टं यस्येमां गां विक्रममेकमाहुस्तदा २४ यदाश्रौषं नरनारायणौ तौ कृष्णार्जुनौ वदतो नारदस्य अहं द्रष्टा ब्रह्मलोके च सम्यक्तदा २५ यदा
श्रौषं लोकहिताय कृष्णं शमार्थिनमुपयातं कुरूणां शमं कुर्वाणमकृतार्थं च यातं तदा २६ ॥ ॥ ॥छ॥छ॥छ॥

त्वात्स्वच २२ निर्जितत्वादिना यं तं यथाप्रतस्यापि सप्ताक्षौहिणीसंपन्नैर्देवान्वकृत्यांतेषामजय्यत्वं हमिसर्थः २३ इमां गां यस्य एकं विक्रमपदमात्रमाहुः यस्यैव त्रायात इति यावत् विक्रमं प
राक्रमं एकं च असाधारणं २४ वदतो नारदस्य समक्षमिति विशेषः २५ २६ ॥ ॥ ॥ ॥ ॥ ॥

दि१

वृकुधावेश्वरूपेण २७ पृथांकुंतीं २८ तेषांपांडवानां २९ स्वपृथ्यकलहो प्रियराजपावहस्पाहयदाकर्णइति ३० गांडीवंधनुरिति गांडीवहस्तगाः गांडः स्यात्संसिखड्गिनीतिमेदिनी । तेनसहवा
निगच्छतीतिगांडीवंतस्यएषवशंतद्धिकारोगांडीवं दीर्घमध्योप्यपंशब्दः क्वचिदलितदार्थः ३१ कश्मलेनमोहेन ३२ अयुतंदशसहस्राणि ३३ आपगेयेनभीष्मेण विहितंधका

यदाश्रौषंकर्णदुर्योधनाभ्यांबुद्धिंकृतांनिग्रहेकेशवस्य तंचात्मानंबहुधादर्शयानंतदा २७ यदाश्रौषंवासुदेवेप्रयाते रथस्यैकामग्रतस्तिष्ठ
मानां आर्तांपृथांसांत्वितांकेशवेनतदा २८ यदाश्रौषंमंत्रिणंवासुदेवंतथाभीष्मंशांतनवंचतेषां भारद्वाजंचाशिषोनुब्रुवाणंतदा २९
यदाकर्णोभीष्ममवाचवाक्यंनाहंयोत्स्येयुध्यमानेत्वयीति हित्वासेनामपचक्रामचापितदा ३० यदाश्रौषंवासुदेवार्जुनौतौतथाधनुर्गां
डीवमप्रमेयं त्रीण्युग्रवीर्याणिसमागतानितदा ३१ यदाश्रौषंकश्मलेनाभिपन्नेरथोपस्थेसीदमानेर्जुनेवै कृष्णंलोकान्दर्शयानंशरीरे
तदा ३२ यदाश्रौषंभीष्ममामित्रकर्शनंनिघ्नंतमाजावयुतंरथानां नैषांकश्चिद्वध्यतेख्यातरूपस्तदा २३ यदाश्रौषंचापगेयेनसंख्येस्वयंमृ
त्युंविहितंधार्मिकेण तच्चाकार्षुःपांडवेयाःप्रहृष्टास्तदा ३४ यदाश्रौषंभीष्ममत्यंतशूरंहतंपार्थेनाहवेष्वप्रधृष्यं शिखंडिनंपुरतःस्थाप
यित्वातदा ३५ यदाश्रौषंशरतल्पेशयानंवृद्धंवीरंसादितंचित्रपुंखैः भीष्मंकृत्वासोमकानल्पशेषांस्तदा॥ ३६ ॥ ॥ ॥

शिखंडिनंतद्वचनस्थापकंहार्यं ३४ तदेवाहवाभीष्म ३५ सोमकानेवाल्पशेषान्कृत्वानत्वेतान ३६ ॥ ० ० ० ० ॥ राम०

भूमिं भित्वेत्यस्यैव किंकर्म ३७ वायोरनुलोमत्वं वृकगणश्वादिहिंस्रं चंद्रसूर्ययोर्लोमस्थानस्थत्वेन शकुनसूचकत्वं विवित्तियादेशकस्यानुकूल्यं पूर्वेषां सेनेशनियातादिश्वापदाः स्वकपक्षे क्रोशंतः ३८ ४१
पार्थमशक्नुवंतो हंतुमिति शेषः तेन च अर्जुनक्रोधाभेः असंतं प्रदीपनात्स्वाकं जयाशेसर्थः ४२ सैंधवे जयद्रथे उक्तं वधेनेन हनिष्यामीत्येवंरूपं प्रतिज्ञां वधे स्वाम्येति प्रतिज्ञातां। भू तत्र तेन तं

थं ३ पा १

यदाश्रौषं शांतनवे शयाने पानीयार्थे चोदितेनार्जुनेन भूमिं भित्वा तर्पितं तत्र भीष्मं तदा ३७ यदा वायुश्चंद्रसूर्यौ च युक्तौ कौंतेयानामनु
लोमा जयाय नित्यं चास्मान्श्वापदा भीषयंति तदा ३८ यदा द्रोणो विविधानस्त्रमार्गान्निदर्शयन्समरे चित्रयोधी न पांडवाञ्छ्रेष्ठतरान्निहंति त
दा ३९ यदाश्रौषं चास्मदीयान्महारथान्व्यवस्थितानर्जुनस्यांतकाय संसप्तकान्निहतानर्जुनेन तदा ४० यदाश्रौषं व्यूहमभेद्यमन्यैर्भा
रद्वाजेनात्तशस्त्रेण गुप्तं भित्वा सौभद्रं वीरमेकं प्रविष्टं तदा ४१ यदाभिमन्युं परिवार्य बालं सर्वे हत्वा हृष्टरूपा बभूवुः महारथाः पार्थमशक्नुवंतस्तदा
४२ यदाश्रौषमभिमन्युं निहत्य हर्षान्मूढान्क्रोशतो धार्तराष्ट्रान् क्रोधादुक्तं सैंधवे चार्जुनेन तदा ४३ यदाश्रौषं सैंधवार्थे प्रतिज्ञां प्रतिज्ञातां तद्व त
धायार्जुनेन सत्यां तीर्णां शत्रुमध्ये च तेन तदा ४४ यदाश्रौषं श्रांतहये धनंजये मुक्त्वा हयान्पाययित्वोपवृत्तान् पुनर्युक्त्वा वासुदेवं प्रयातं तदा
४५ यदाश्रौषं वाहनेष्वक्षमेषु रथोपस्थे तिष्ठता गांडिवेन सर्वान्योधान्वारितानर्जुनेन तदा ४६ यदाश्रौषं नागबलैः सुदुःसहं द्रोणानीकं युयु
धानं प्रमथ्य यातं वार्ष्णेयं यत्र तौ कृष्णपार्थौ तदा ४७ यदाश्रौषं कर्णमासाद्य मुक्तं वधाद्भीमं कुत्सयित्वा वचोभिः धनुःकोट्या तुद्य कर्णेन वीरं तदा १०

यां कृष्णं एव भविष्यतीति जयो यथा यं पराजय एवेत्यजानतः ४३ ४६ युयुधानं युध्यमानं वार्ष्णेयं यं सात्यकिं ४७ कर्णमासाद्य पितृवधान्मुक्तं त्वत्पक्षस्य सत्त्वं भीमसेनमश्रौषमित्यन्वयः
पः त्वात्वधात्सर्वतो व्यथयित्वा वचोभिर्नितमभत्सा कुत्सयित्वा मेरु श्रोत्रेदरिकेत्यादि शब्दैर्निर्दिष्टो यो हृत इति शेषः ४८ ॥ ७ ॥श्रीरामायनमः॥ ॥श्रीरामचंद्रायनमः

अमर्षयन्नमर्षणं सहनं कृतवन्तः अशक्ताः ४९ व्यंसितां व्यर्थीकृतां माधवेन कर्णस्याविधिय प्रवर्तकेन घोररूपे इति घटोत्कचस्यापि वध्यत्वेन तद्वधेनापि कृष्णस्य हर्ष एव न क्षतिरिति भावः ५० घटोत्क
चाभ्यां युद्धे क्षिप्यमाणा इति शेषः अर्जुनस्यापि वध्यत्वे सिद्धे का जयाशेति भावः ५१ प्रायगतं मरणार्थमनशनं प्राप्य तत्र गतं तदर्थं निश्चलं स्थितं विशस्तं छिन्नं ५२ द्रौणिना नकुलमिति द्रौणि

२९१

यदा द्रोणः कृतवर्मा कृपश्च कर्णो द्रौणिर्मद्रराजश्च शूरः अमर्षयन्सैंधवं वध्यमानं तदा ४९ यदाश्रौषं देवराजेन दत्तां दिव्यां शक्तिं व्यंसितां माधवेन घ
टोत्कचे राक्षसे घोररूपे तदा ५० यदाश्रौषं कर्णघटोत्कचाभ्यां युद्धे मुक्तां सूतपुत्रेण शक्तिं यया वध्यः समरे सव्यसाची तदा ५१ यदाश्रौषं
द्रोणमाचार्यमेकं धृष्टद्युम्नेनाभ्यतिक्रम्य धर्मं रथोपस्थे प्रायगतं विशस्तं तदा ५२ यदाश्रौषं द्रौणिना द्वैरथस्थं माद्रीसुतं नकुलं लोकमध्ये
समं युद्धे मंडलशश्चरंतं तदा ५३ यदा द्रोणे निहते द्रोणपुत्रो नारायणं दिव्यमस्त्रं विकुर्वन् नैषामंतं गतवान्पांडवानां तदा ५४ यदाश्रौषं
भीमसेनेन पीतं रक्तं भ्रातुर्युधि दुःशासनस्य विनिवारितं नान्यतमेन भीमं तदा ५५ यदाश्रौषं कर्णमसंतं च हतं पार्थेनाहवेष्वप्रधृष्यं त
स्मिन्भ्रातॄणां विग्रहे देवगुह्ये तदा ५६ यदाश्रौषं द्रोणपुत्रं च शूरं दुःशासनं कृतवर्माणमुग्रं युधिष्ठिरं धर्मराजं जयंतं तदा ५७ यदाश्रौषं
निहतं मद्रराजं रणे शूरं धर्मराजेन सूत सदा संग्रामे स्पर्द्धते यः स कृष्णं तदा ५८ यदाश्रौषं कलहद्यूतमूलं मायाबलं सौबलं पांडवेन हतं सं
ग्रामे सहदेवेन पापं तदा ५९ यदाश्रौषं श्रांतमेकं शयानं ह्रदं गत्वा स्तंभयित्वा तदंभः दुर्योधनं विरथं भग्नशक्तिं तदा ६० ॥ छ ॥ छ

निकृष्टत्वमुक्तं ५३ ५५ देवगुह्ये पार्थानां कर्णो मोदपत्वाज्ञानात् प्रवृत्ते विग्रहे युद्धे ५६ युधिष्ठिरं द्रोणपुत्रादीनजयंतमित्यन्वयः ५७ मद्रराजं शल्यं स्पर्द्धते जेतुमिच्छति सर्वः ५८ पुनर्द्यूतस्य संजननेना
पि जयाशा नास्तीति भावः ५९ भग्नाशक्तिर्मंत्रोत्साहादिजं सामर्थ्यं यस्य ६० ॥ ॥श्रीरामायनम॥ ॥श्रीरामायनम॥ ॥ ॥ ॥ ॥ छ

प्रच्छन्नोपिपौरवृद्धैर्देवात्कालांतरोपितत्पाशास्याप्तापिनात्तीसाह। यदाश्रौषंपांडवानामिति। अमर्षणां अशक्तस्यापीतिक्रोधशीलानामवश्यंभावीतिभावः ६१ मिथ्याहतंनामयोधः सुहृद्गणस्तक
परेनहतंतस्मिन्नंतेजयाशानास्तिमूलोच्छेदादितिभावः ६२ दुष्कर्मकारिणोदुर्योधनस्यदारेषुकश्चिन्महानधर्मभावः पुत्रमपिनोसादपिष्यतिअतनहाराज्याशानास्तीतिभावः ६३ अ
नुयातेनहंतुंअनद्रुतेन। अस्त्रमस्त्रेणाकवयोगात्स्वीयस्यापि। अश्वत्थाम्नोतिजयशीतकर्मत्वानमणिहीनत्वात्तवकुशायग्रस्तत्वाच्चदुर्योधनकेत्रेषुपुंजनहाराज्यलाभहतस्यजयाशंसापि

३१

ना१

यदाश्रौषंपांडवांस्तांनिष्क्रमाणानालाद्धदेवासदेवेनसार्द्धं अमर्षणांधर्षयंतः सतंमेतदा ६१ यदाश्रौषंविविधांश्चित्रमार्गानिदायुद्धेषुमंडलशस्त्र
रंतं मिथ्याहितंनवासदेवस्यबुद्ध्यातदा ६२ यदाश्रौषंद्रोणपुत्रादिभिस्तैर्हतान्पांचालान्द्रौपदेयांश्चसुप्तान् कृतंवीभत्समयशस्यंचकर्मतदा ६३
यदाश्रौषंभीमसेनानुयातेनाश्वत्थाम्नापरमास्त्रंप्रयुक्तं क्रुद्धेनैषीकमवधीद्येनगर्भंतदा ६४ यदाश्रौषंब्रह्मशिरोर्जुनेनस्वस्तीत्युक्त्वास्त्रमस्त्रेण
शांतं अश्वत्थाम्नामणिरत्नंचदत्तंतदा ६५ यदाश्रौषंद्रोणपुत्रेणगर्भेवैराट्यावैपात्यमानेमहास्त्रेः द्वैपायनःकेशवोद्रोणपुत्रंपरस्परेणाभि
शापैःशशाप ६६ शोच्यागांधारीपुत्रपौत्रैर्विहीनातथावंधुभिः पितृभिर्भ्रातृभिश्च। कृतंकार्यंदुष्करंपांडवेयैः प्राप्तंराज्यमसपत्नंपुनस्तैः ६७ कष्टं
युद्धेदशशेषाःश्रुतामेत्रयोस्माकंपांडवानांचसप्त द्व्यूनाविंशतिराहताक्षौहिणीनांतस्मिन्संग्रामेभैरवेक्षत्रियाणां ६८ ॥ ॥ छ

भा८:१

नासीतितत्पर्यतेयदाशशापतदाशंसेविजयायेसंतिमश्लोकेपूर्वान्वकर्षणान्वयः ६४ ६६ शोच्यागांधारीअहंतुतामपिशोचनशोच्यनइति। यद्वागांधार्येवशोच्यानत्वहंउदा
सीनत्वात्तनमेविशेषइतिभावोक्तेः अतः पांडवानांजयोपिममैवजयइतिभावः ६७ त्रयंकृपोश्वत्थामाकृतवर्मा वा सप्तकृष्णसात्यकीपंचपांडवाश्च ६८ ॥ छ ॥ छ
यदाश्रौषंविविधांश्चित्रमार्गानित्यादिश्लोकपंचकतात्पर्यसंग्रहश्लोकोगांधारीशर्मराज्यभ्रष्टोपिजीवेयदिममतनयोमामकावैविनिशायांपचस्वेकंनि
हत्युयदिक्षिनभवेद्धृष्टद्युम्नहाद्रोणपुत्रः नीरत्नोवासनस्यायदिमगवच्चापदधोनसस्यात्ततैःपौत्रैर्जयःस्यान्ममनचतदभूदितिस्त्रमस्मृद्धिनांघटति

तमः शोकावेशाद्वक्तृणा वरगंवाद्यंमोहः कार्याकार्ययोरप्रतिपत्तिः अत एव संज्ञो विशेषविज्ञानं नोपलेभे। विह्वलति शोकेनाकुलीभवति ६९ अत एव मूर्छितः अतः संज्ञाशून्यः ७०

तमस्तमीव विलीयीं मोह आविशतीव मां संज्ञां नोपलभे सूत मनो विह्वलतीव मे ६९ सोतिरुवाच इत्युक्त्वा धृतराष्ट्रोथ विलप्य बहुदुःखितः मूर्छितः पुनराश्वस्तः संजयं वाक्यमब्रवीत ७० संजयैवं गते प्राणांस्त्यक्तुमिच्छामि माचिरं स्तोकं ह्यपि न पश्यामि फलं जीवितधारणे ७१ सोतिरुवाच तं तथावादिनं दीनं विलपन्तं महीपतिं निश्वसन्तं यथा नागं मुह्यमानं पुनः पुनः ७२ गावल्गणिरिदं धीमान्महार्थं वाक्यमब्रवीत संजय उवाच श्रुतवानसि वै राजन्महोत्साहान्महाबलान ७३ द्वैपायनस्य वदतो नारदस्य च धीमतः महत्सु राजवंशेषु गुणैः समुदितेषु च॥ जातान्दिव्यास्त्रविदुषः शक्रप्रतिमतेजसः धर्मेण पृथिवीं जित्वा यज्ञैरिष्ट्वाप्तदक्षिणैः ७५ अस्मिँल्लोके यशः प्राप्य ततः कालवशं गतान शैब्यं महारथं वीरं सृंजयं जयतां वरं ७६ सुहोत्रं रन्तिदेवं च काक्षीवन्तं महाद्युतिं वाल्हीकं दमनं चैव शर्यातिमजितं नलं ७७ विश्वामित्रममित्रघ्नमम्बरीषं महाबलं मरुत्तं मनुमिक्ष्वाकुं गयं भरतमेव च ७८ रामं दाशरथिं चैव शशबिन्दुं भगीरथं कृतवीर्यं महाभागं तथैव जनमेजयं ७९ ययातिं शुभकर्माणं देवैर्यो याजितः स्वयं चैत्ययूपांकितां नाम भूमिर्यस्येयं सवनाकरा ८० इति राज्ञां चतुर्विंशं नारदेन सुरर्षिणा। पुत्रशोकाभितप्ताय पुरा शैब्याय कीर्तितं॥ ८१ ॥ ७ ॥ ७ ॥

७१ ७२ गावल्गणस्यापत्यं गावल्गणिः संजयः ७९ चैत्यैर्वयतनवत्तिक्रतो वितिह्नितौ यैः यैः संचैत्ययूपाश्चैतेरंकितां ८० चतुर्विंशति इतीका स्तोयात्वार्षः ८१ ॥ ॥ ७

९० तव पुत्रा इवेति निधने दृष्टांतः अत एव तव पुत्रा दुरात्मान इत्युच्यते ९१ त्यागो दानं आस्तिक्यं गुरुवेदवाक्यादिषु फलावश्यंभावनिश्चयः सत्यं मनोद्रोहवर्जितं यथार्थभाषणं दया परदुःख

नेमश्चान्ये गताः पूर्वं राजानो बलवत्तराः महारथा महात्मानः सर्वैः समुदिता गुणैः ८२ पूरुः कुरुर्यदुः शूरो विश्वगश्वो महाद्युतिः अणुहो युवना
श्वश्च ककुत्स्थो विक्रमी रघुः ८३ विजयो वीतिहोत्रोऽङ्गो भवः श्वेतो बृहद्गुरुः उशीनरः शतरथः कंको दुलिदुहो द्रुमः ८५ देवाह्वयः सद्दमि
मः सत्यतीको बृहद्रथः महोत्साहो विनीतात्मा सुक्रतुर्नैषधो नलः ८६ सत्यव्रतः शांतभयः सुमित्रः सुबलः प्रभुः जानुजंघोऽनरण्योऽर्कः प्रि
यभृत्यः शुचिव्रतः ८७ बलबंधुर्निरामर्दः केतुशृंगो बृहद्रथः धृष्टकेतुर्बृहत्केतुर्दीप्तकेतुर्निरामयः ८८ अविक्षिच्चपलो धूर्तः कृतब
न्धुर्दृढेषुधिः महापुराणसंभाव्यः प्रत्यंगः परहा श्रुतिः ८९ एते चान्ये च राजानः शतशोऽथ सहस्रशः श्रूयंते शतशश्चान्ये संख्याताश्चैव
पद्मशः ९० हित्वा सुविपुलान्भोगान् बुद्धिमंतो महाबलाः राजानो निधनं प्राप्तास्तव पुत्रा इव प्रभो ९१ येषां दिव्यानि कर्माणि विक्रमस्त्या
ग एव च माहात्म्यमपि चास्तिक्यं सत्यं शौचं दयार्जवं ९२ विद्वद्भिः कथ्यते लोके पुराणैः कविसत्तमैः सर्वर्द्धिगुणसंपन्नास्ते चापि निधनं गताः
९३ तव पुत्रा दुरात्मानः प्रतप्ताश्चैव मन्युना लुब्धा दुर्वृत्तभूयिष्ठा न तांछोचितुमर्हसि ९४ श्रुतवानसि मेधावी बुद्धिमान्प्राज्ञसंमतः येषां
शास्त्रानुगा बुद्धिर्न ते मुह्यंति भारत ९५ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

प्रहाणेच्छा आर्जवं अकौटिल्यं ९२ नैवापि तथाविधा अपि ९३ दुरात्मानो दुष्टचित्ताः प्रतप्ताः तीव्रागा दुर्वृत्तमेव भूयिष्ठं येषां ते तथा ९४ स्वयंकृतैः अनर्थैः किं शोकेनेत्याह श्रुतवानसीत्यादि

निग्रहः पांडवेषु। अनुग्रहः स्वपुत्रेषु नैव कृतौ। न चैव विदितौ अतः स्वपुत्राणां रक्षणोपायानुष्ठानाभावेन कार्पण्यं घृतं तेइति पाठे अस्मैः कृते तिन अपेक्ष्यंतत्स्वपापेन कार्पण्यमिदानादिपापकृतं
नाशस्यावश्यंभावित्वादिति भावः ॥६६ वृत्तिः कर्मत्वमारणिजि मापेन प्राकृतस्य कर्मणोऽनुवृत्तिर्वा त्वया स्वकृतेपि नासंतं पश्चात्तापेन शोकः कर्तव्य इत्याह भवितव्यमिति ॥६७ मार्गं स्वप
श्यमेव भोक्तव्यं कृतं कर्म शुभाशुभमित्येवरूपां पद्धतिं न तत्प्राकृतमत्र शोचामीति चेत्तत्राह कालेति यायातत्स्वफलप्राप्त्यादिर्मः कालेक हेतु तथापुरुषेषु मदस्ततुल्यमोपी सर्थः

निग्रहानुग्रहौ चापि विदितौ ते नराधिप। नासंतमेवानुवृत्तिः कार्या ते पुत्ररक्षणे ॥६६॥ भवितव्यं तथा तच्च नातः शोचितुमर्हसि। दैवं प्रज्ञावि
शेषेण को निवर्तितुमर्हति ॥६७॥ विधातृविहितं मार्गं न कश्चिदतिवर्तते। कालमूलमिदं सर्वं भावाभावौ सुखासुखे ॥६८॥ कालः सृज
ति भूतानि कालः संहरते प्रजाः। संहरन्तं प्रजाः कालं कालः शमयते पुनः ॥६९॥ ॥ ॥ ॥ ॥ ॥

भावाभावौ वस्तुनोउद्भवानुद्भवौ ऐश्वर्यानैश्वर्ये वा ॥६८ कालः निमेषादिर्वत्सरांतः भूतानि तत्पुत्रादीनि सृजति संहरते च प्रजाः अन्या एवं शोचंतं धृतराष्ट्रं तत्पितो शोकमात्मविदिति अतः आत्मज्ञान
प्रदानेनैः शोकं कर्तृत्वमं जीवानां कालाहृष्टत्वादिया तत्रप्रदर्शनेनाकिंचित्कस्वप्रबोधनेन च तस्यैवोपमसाध्यात्मानमुपदिशति। संहरंतं प्रजाः कालं कालः शमयते पुनरिति। मत्सममसंत
मात्मानमिति अतः कालस्यापि कालः तमपि कालः शमयतीत्यत्र छंदवध्याहारेणायोज्यम् ॥६९॥ ॥ ॥रामायनमः॥ ॥श्रीरामनाममत्तारकं॥ ॥श्रीरामकी

कालो हीति अयं महाकालो हि श्रुतिप्रसिद्धो वेदस्य एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष एवासाधु कर्म कारयति तं यमधो निनीषत इत्यादौ कुरुते भावानर्थानर्थांश्च तस्य यो
जकत्वेन चिन्तयितव्यत्वेन ईशानो शरूपो यमेवेत्यर्थः प्रजाः अव्यक्तमहदादयः २० सुप्तेषु नष्टेषु लीनेषु जागर्ति सर्वसंकोचकत्वेन मोक्षे च । अनुग्रहकृच्छक्तिरयं । न हि दुष्टं हि ष
र्विपर्यासो यो विधृतेः विनाशित्वादिति श्रुतेः कालो हि अतिदुरतिक्रमः अलंघनीयः प्रकृष्टानन्तपरं किं चिच्छाकाशसायनगमिति श्रुतेः यानि शास्त्रशासितभावेन । अत:

कालो हि कुरुते भावान्सर्वांल्लोके शुभाशुभान् कालः संक्षिपते सर्वाः प्रजाः विसृजते पुनः २०० कालः सुप्तेषु जागर्ति कालो हि दुरतिक्रमः
कालः सर्वेषु भूतेषु चरत्यविधृतः समः १ अतीतानागता भावा ये च वर्तन्ति सांप्रतं तान्कालनिर्मितान्बुध्वा न संज्ञां हातुमर्हसि २ सौतिरुवाच
इत्येवं पुत्रशोकार्त्तं धृतराष्ट्रं जनेश्वरं आश्वास्य स्वस्थमकरोत्सूतो गावल्गणिस्तदा ३ ॥ ॥ ॥ ॥ ॥छ

प्रदिष्टः शास्त्रजनतानां सर्वात्मेति श्रुतेः अविधृतः न केन चित् विधृतः सर्वाधिष्ठानत्वात् । अत एव समः आत्मा समम् आत्मेति विधानात् निर्दोषं हि समं ब्रह्मेति स्मृतेः अभिन्नो ब्रह्मणि
समशब्दप्रयोगात् २ सर्वे आत्मप्रभवमिति बुद्ध्वा संज्ञां न निष्ठानं सक्तुमर्हसि त्वं पुत्रशोकनाशोपायस्याभावादित्यर्थः स्वस्थं शोकहेतुं देहाद्यभिमानं त्याजयित्वा निरूपाधौ स्वस्व
रूपे प्रतिष्ठितमकरोदित्यर्थः ३ ॥ श्रीरामाय नमः ॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥ राम

अत्र शोकाग्नीनां स्वास्थ्यकारणो विषयेऽश्यानिषदं उपनीपेममात्मानं ब्रह्मापात्तत्तूपंघतः निंहं सविधांनकुर्वतस्मात् उपनिषद्वेदेति पथोक्तं विद्याहेतुत्वात् तथोपपुपनिषद्वेदेति वचनात् ब्रह्मात्मैकत्व विद्याश्रुतिपादकं ग्रंथः। स च हृस्रोः डागुक्तयोर्वी निःकछ्रोनीयं उपनिषद्व्रह्वाचं अब्रवीत। पद्यप्यत्र १ रूषार्थचतष्टयंति पादनं दृश्यते तथाप्यर्थकामयोर्लौकप्रसिद्धपोरेव स्वरूपाख्याक्तिं पेनिन्याये नहानार्थोम नत्वाद्दाहूर्मस्य च वि [illegible] विदिषंनिपेङ्नेसादिक्रसाविद्याशेषत्वस्यदर्शितत्वात् सर्वमतानां सर्वविद्यानामेवेतिध्येयं अस्याः सांप्रदायिकत्वमाह विहद्भिरिति। कथ्यते अनादिसिद्धमेव कीर्त्यतेनतत्कादंचपादिवदभिनवकथाकथ्यतेकविसत्तमैः पूर्वपूर्वकल्पीयेव्यासादिभिः एवं च व्याख्यादिशब्दानां तेनोपस्यादिशब्दवदाधिकारिवचनत्वेन व्यक्तपनिसत्वेपितदर्थानां नित्यत्वात् पुराणा

अत्रोपनिषदं पुराणं कृष्णद्वैपायनोऽब्रवीत विहद्भिः कथ्यते लोके पुराणे कविसत्तमैः ४ भारताख्य [illegible] पनं पुराणमपिया

दमधीपतः श्रद्दधानस्य पूयंते सर्वपापान्यशेषतः ५ ५ ५ ५ ५ ५ ५ ५॥

तांसकर्तृकत्वमात्राद्नित्यत्वं अत एव स्मंतु जैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्या इति मंत्र सपुराणादि [illegible] प्रणेत्राचार्यसंग्रहवतोनि [illegible] सेननर्थणिविधिनासंयोगः संगच्छते। अस्य था। नित्सानिसमंयोगविरोधो दुर्वारः स्यात्। अत एव पुराणं पुराणमिति ४ भारतेति तिसेव हृत्ययज्ञेऽक्षवोधी तेपपत्राहृमिति भिरवदेवता स्तर्पयती स्वगादीनां भिवइतिहासपुराणानीस्यमता कृतेभिरितिनिनदध्ययनफलश्रुतिः पितुः स्तनस्य भिवेसाहपुराणमिति पूयंतेनश्यंति। अस्य श्लोकस्य च वनुर्थी शोच्चारणमात्रादपि सर्वपापनाशः किं वाच्यं तत्स्वाध्यायनाच्च तदर्थस्य ज्ञानान्तरमा

कृत्वा राद्वेति भावः ५ रामायनम॥ ॥ ॥ ॥ ॥

एवं यथ सत्वास्थं मुख्यं फलं पापक्षयं गुणफलं चोक्त्वा अथ तत्प्राप्त्यै विषयमाह देवा इति देवादीनां शुभकर्माणाम् इति विशेषणेन तेषां शुभमेव कर्मोपायादेयं विवक्षितं न तु स्वैव्यपरं परया परमपुरुषार्थहेतुत्वेन
६ मुख्यं विषयमाह भगवानिति। ऐश्वर्यस्य समग्रस्य ज्ञानस्य पुण्यशमः श्रियः वैराग्यस्य मोक्षस्य षण्णां भग इतीरणा नेतृ(?) षड्गुणैश्वर्यवान् परमात्मा वासुदेवः वसुदेवो सत्ति शरीरे याधिः सर्वशरीरेया
धिष्ठितेन शरीरेण तिमानुषाणि वक्षिपानादीनि कर्माणि कृतवान् इति तिलरुपादान तथा हि। ब्रह्मोणिधजिभगवद्वाक्यं विधेहं सर्वेस्मिन्न जप्य थकगोवत्सवदहं विभर्म्यखिलाङ्गं गोरेव दहम [illegible]

देवा देवर्षयो यच्च तथा ब्रह्मर्षयोऽमलाः कीर्तयन्ति शुभकर्माणि तथा पञ्च महोरगाः ६ भगवान्वासुदेवश्च कीर्त्यतेऽत्र सनातनः स हि सत्यमृतं
चैव पवित्रं पुण्यमेव च ७ शाश्वतं ब्रह्म परमं ध्रुवं ज्योतिः सनातनं यस्य दिव्यानि कर्माणि कथयन्ति मनीषिणः ८ ॥ ॐ ॥

ज्वलनवत सृजामि द्रोपघावसनयदहं प्राणम दहं पदन्ताहं न सो [illegible] मृति रितिमदम्यच्च किमपीति। तस्य वास्तवं रूपमाह सनातन इति श्वाकाशादिवस्ववाहनिमनपात्रामाप्यपाच्याद्यं नभूत्वा ह्यानन्म
ध्यमभगवच्छरीरस्य नित्यत्वायस्य यर्थं सनातनत्वं पुण्यतस्त्यर्थः सः वासुदेवो हि सत्यं सत्यं च सुखं पमानं कर्माख्यं तद्वेवेदान्तज्ञापमानं पवित्रं पापनाशकं पुण्यं ज्ञप्युदयहेतुः सर्वकर्मफलम
तत्रत्योऽस्तु स्तम्भ एवेतिभावः ७ अस्यैवनिविशेषत्वमाह शाश्वतं शाश्वतनित्यं भवं शाश्वतं तेनवस्तुतोदेशतश्चापरिच्छिन्नं ब्रह्म एव ब्रह्म बृहत्तपरमं कार्यकारणातीतं ध्रुवं कूटस्थं ज्योतिः चिन्मात्रं स
नातनं कालतोऽपरिच्छिन्नं। यस्य इह शब्दापिमायया विग्रहवतः ८ ॥ ॐ ॥ ॐ ॥ ॐ ॥ ॐ

श्रा०
२७

वनिरां

र्हृशादपि यस्मात्त्वमसत्सद्विलक्षणं अनिर्वचनीयं सदसद्वयकार्यकारणं च तदुभयात्मकं विश्वं जातं संततिः ब्रह्मादिः प्रवृत्तिपरंपरादिः ९ आत्मनो यध्यात्मं देहे पंचपंचभूतकार्यरूपाः गुणाः श्रोत्रादय तदात्मकं सप्राणान्तेव प्राणोनामभयं वदन्वाक्पश्यन्चक्षुः शृण्वन्श्रोत्रं मन्वानो मन इत्यादिश्रुत्योपसंहृत्य पुनर्जीवरूपं। इति तत्पदार्थमनूद्य तत्पदार्थमाह अव्यक्तादि अव्यक्तमव्याकृतं तदादिभूतं पंचतयं निर्विशेषं ब्र तयोरभेदमाह स एवेति। परिगीयते वेदैः अयमात्मा ब्रह्म अहं ब्रह्मास्मीत्यादौ। ननु तत् प्रविष्टः शास्तारं जनानामिति शास्तृशास्यभावेन भक्तयोरीशजीवयोः जन्मस्य ऋते भेदस्योपचारिकः नन्तत्तात्त्वि कइत्येव नन्वयं तः प्रविष्टस्तेः किं जीवोऽणुर्विभुर्वानाद्यः अणुः स्वेशात् सत्प्रवेशायोगात् प्रवेशे च सांतरालस्यावापत्या योगान्मध्यमस्य च सावयवत्वेन घटादिवदनित्यत्वं श्यभावात्। विभुनो त्वा कालाका

असत्त्वमसदेवेदं यस्माद्विश्वं प्रवर्तते संततिश्च प्रवाहश्च जन्ममृत्युपुनर्भवाः ९ अध्यात्मं श्रूयते यच्च पंचभूतगुणात्मकं अव्यक्तादिपरं यच्च स एव परिगीयते १० यत्र युक्तिपरायुक्ता ध्यानयोगबलान्विताः प्रतिबिंबमिवादर्शे पश्यंसात्मानमवस्थितं ११ श्रद्दधानाः सदायुक्ताः सदा धर्मपरायणाः आत्मैवात्मनमध्यायंताः पापात्प्रमुच्यते १२ अनुक्रमणिकाध्यायं भारतस्यममादितः आस्तिकः सततश्च एवन्न कृच्छ्रेष्ववसीदति १३

शादेरिव तत्त्वेन मिथः शास्यशास्तृत्वायोगात् तस्मादु पादानोपादेयभावेन वाधिष्ठानाध्यस्तभावेन वा ईशजीवयोः प्रवेष्टृप्रवेश्यभावेन शास्तृ शास्यभावः तेनेशस्यांतः प्रावेष्टृत्वं संगच्छते तथा च तयोरभेदो पि तात्विक एव १० अत्र विद्वदनुभवं प्रमाणयति यत्रेति। आत्मनि हार्दाकाशे पश्यंति प्रसंगभेदेन प्रतिबिंबमिवादर्शे इति असंदिग्धत्वे दृशांतः न तद्दृश्यते। अन्यथा दृश्यस्य जडत्वापात् ज्ञानमात्मनी तत्वश्रुतिव्याकोपएव १२ युक्तः नियमवान् आसेवनजपेन। आदितः नारायणं नमस्कृत्ये सारभ्य तेन भारतकथांशमात्रं यः श्रावणात्मजो विद्वान् निमूल मू१ एवारभ्य नादरवश्यामि इति भावः १३ ॥

राम०
२८

जपन्किंचित्अनुक्रमण्याः कांश्चिदपि श्लोकान् १४ एतद्भारतस्य वपुः शरीरं सत्यं ब्रह्म अमृतं देवभाग्यं चैवाभीष्टार्थः उत्तमं तस्मादिदं श्राव्यं परिचार्यं स्थानीयः न स्वल्पं चैव तत्त्वेन मे मतिर्थः १५
आरण्यकं उपनिषत् ओषधिभ्यो यथादिभ्यः अमृतं यज्ञशेषः १६ इतिहासानां श्रीवरहस्यादीनां मध्ये १७ इतिहासेतिपदद्वयं मा पिनं मृगं तमुल्लं मायया वधीरिति मंत्रावयवो हि मायणीय

उभे संध्ये जपन्किंचित्सद्योमुच्येत किल्बिषात् अनुक्रमण्या यावत्स्यादह्ना रात्र्या च संचितं १४ भारतस्य वपुर्ह्येतत्सत्यं चामृतमेव च नवनीतं यथा
दध्नो द्विपदां ब्राह्मणो यथा १५ आरण्यकं च वेदेभ्य ओषधिभ्योऽमृतं यथा ह्रदानामुदधिः श्रेष्ठो गौर्वरिष्ठा चतुष्पदां १६ यथैतानी
तिहासानां तथा भारतमुच्यते यश्चैनं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमंततः अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते १७ इतिहासपुराणा
भ्यां वेदं समुपबृंहयेत् बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति १८ कार्ष्णं वेदमिमं विद्वान्श्रावयित्वार्थमश्नुते भ्रूणहत्याकृतं चापि पा
पं जह्याद संशयं। १९ य इमं शुचिरध्यायं पठेत्पर्वणि पर्वणि अधीतं भारतं तेन कृत्स्नं स्यादिति मे मतिः २० यश्चैनं शृणुयान्नित्यमार्षं श्र
द्धासमन्वितः स दीर्घमायुः कीर्तिं च स्वर्गतिं चाप्नुयान्नरः २१ एकतश्चतुरो वेदा भारतं चैतदेकतः पुरा किल सुरैः सर्वैः समेत्य तुलया धृतं २२
चतुर्भ्यः सरहस्येभ्यो वेदेभ्योऽप्यधिकं यदा तदाप्रभृति लोकेऽस्मिन्महाभारतमुच्यते २३ ॥ म॰ वै॰ १ ॥ ॥ ॥

मारीचवधज्ञेनैवोपबृंहितं शक्यो ज्ञातुं वेदो मामयं प्रहरिष्यति तस्मादल्पश्रुतादेव भयमुचितमेव वेदार्थजिज्ञासुना इदमवश्यमध्येतव्यमिति भावः १८ कार्ष्णं कृष्णेन व्यासेन प्रोक्तं वेदं पुरुषार्थचतुष्कं वेद
यंतः १९ २० २१ तुलया धृतं न्यूनाधिकभावेन परीक्षितं २२ सरहस्येभ्यः सोपनिषत्केभ्यः अधिकं अर्थगौरवयुक्तं २३ ॥श्रीरामायनम॥ ॥श्रीरामजी

महत्वेपधृतत्र्अधिके गुरुत्वेअर्थतआधिके २४ नवृत्रानर्थकोपुत्रादिपलायोमृपानदृश्यतेकाणिकनीसादिश्वाधर्मेप्रवर्तकोपिपर्युषोजितनःशुक्रचिह्नार्दिकथनेससावेपिविषसंहकोल्प
वल्कत्वमप्येततहेयमेवसाशंक्याहतपइति। तपः कृच्छ्रचांद्रायणादि। कल्कः पापंतदभावोनकल्कः कल्कोद्वीशमलैनसोरिसमारः नभ्राउदिवत्र प्रकृतिभावः तपोनिर्मलसाधनमिथ
र्थः। विरोधित्वेवानकार्थः तेनतपः पापनाशकमित्यर्थः अध्ययनंवेदस्य। स्वाभाविकस्वस्ववर्णाश्रमादिप्रकारेणविहितः शमोदमस्तपः शौचमित्यादिः वेदविधिः वेदोक्तोविधिरग्निहोत्रमे
ध्यापासनादिः प्रसह्यप्रकर्षेणमोहात्कदर्यादेः स्वमपिमोहाद्वित्तस्याहरणंशिलोञ्छादिनाअर्जनंतदपिनकल्कोनैर्मल्यसाधनं तान्येवतपआदीनिभावेनचित्तेनाभिप्रायेणउपहतानिकल्क

महत्वेचगुरुत्वेचध्रियमाणंयतोधिकं महत्वाद्भारवत्वाच्चमहाभारतमुच्यते ॥ निरुक्तमस्ययोवेदसर्वपापैः प्रमुच्यते २४ तपोनकल्को
ध्ययनंनकल्कः स्वाभाविकोवेदविधिर्नकल्कः प्रसह्यवित्ताहरणंनकल्कस्तान्येवभावोपहतानिकल्कः २५ इतिश्रीमहाभारतेआ
दिपर्वणिअनुक्रमणिकाध्यायः ॥श्रीरामायनमः॥ ॥श्रीरामायनमः॥ ॥श्रीरामचंद्रजीव॥ ॥श्रीकालभैरवायनमः॥ एम

पापंपापहेतुर्भवंति। यथाशीतादिसहनंतानवच्छेदः कारकस्थैश्वर्तल्पवत्रिमतेनतथापिभावभेदात्रवेकस्यस्वर्गाययम्यस्यनरकायभवति। वह्नंतिचत्वारिकर्माणिभयंकराणिभयंप्रयच्छंत्ययथाकृता
निमानाग्निहोत्रंमतमानमौन [illegible] मानेमानाधीतमतमानयज्ञइतिएवंशिलोंछादिकमपिदंभेनकृतंपापायास्यथाश्रेयसेभवतिएवंभारतेविधमत्रिमुखप्रतिपादनेएवयामतानाना
सर्वं अर्थवादजातमपिभारतंपापायेवभवतितथाचसर्वस्मादपिपुण्यंथात्साराम वादेयमितरन्त्याज्यमितिसूच्यते। ग्रंथमभ्यस्यमेधावीज्ञानविज्ञानतत्परः पलालमिवधान्यार्थीस
मंतुत्यजमशेषतइति २५ इतिश्रीमहाभारतेआदिपर्वणिप्रथमोध्यायः ॥ ॥श्रीरामायनमः॥ ॥श्रीकालभैरवायनमः॥ ॥श्रीरामचंद्रायनमः॥ ॥राम एम०

एवं प्रथमेऽध्याये सूत्रितानामर्थानां प्रकरणशो विभागं शिष्याणामवधानाय प्रदर्शयिष्यन्नादौ रामप्रसादपितृकृतं कुरुक्षेत्रतीर्थं प्रशंसार्थं दर्शयति समन्तेति । समन्तपञ्चकं नाम पुण्यं द्विजनिषेवितं ग
न्तव्यमिति देशप्रहूय प्रत्रामवसरे त्यादिना यदुक्तं एतत्सर्वमितं देशं तत्त्वेन श्रोतुमिच्छामहे वयं १ मम मत्तः कथाश्रमाः २ कृत्स्नं क्षत्रियजाति अमर्षः स्वपितुः क्षत्रियेण हननाज्जातस्तत्क्रोधः स एवामर्षहन्ते

ऋषय ऊचुः समन्तपञ्चकमिति यदुक्तं सूतनन्दन एतत्सर्वं यथातत्त्वं श्रोतुमिच्छामहे वयं १ सौतिरुवाच शृणुध्वं मम भो विप्रा ब्रुवतश्च कथाः शुभाः
समन्तपञ्चकाख्यं च श्रोतुमर्हथ सत्तमाः २ त्रेताद्वापरयोः संधौ रामः शस्त्रभृतां वरः असकृत्पार्थिवं क्षत्रं जघानामर्षचोदितः ३ स सर्वं क्षत्रमु
त्साद्य स्ववीर्येणानलद्युतिः समन्तपञ्चके पञ्च चकार रौधिरान्ह्रदान् ४ स तेषु रुधिराम्भःसु ह्रदेषु क्रोधमूर्छितः पितॄन्संतर्पयामास रुधिरेणेति
नः श्रुतं ५ अथर्चीकादयोऽभ्येत्य पितरो राममब्रुवन् राम राम महाभाग प्रीताः स्म तव भार्गव ६ अनया पितृभक्त्या च विक्रमेण च ते विभो वरं वृ
णीष्व भद्रं ते यमिच्छसि महाद्युते ७ राम उवाच यदि मे पितरः प्रीता यद्यनुग्राह्यता मयि यच्च रोषाभिभूतेन क्षत्रमुत्सादितं मया ८ अतश्च
पापान्मुच्येऽहमेष मे प्रार्थितो वरः ह्रदाश्च तीर्थभूता मे भवेयुर्भुवि विश्रुताः ९ एवं भविष्यतीत्येवं पितरस्तमथाब्रुवन् तं क्षमस्वेति निषिषिधुस्ततः
स विरराम ह १० तेषां समीपे यो देशो ह्रदानां रुधिराम्भसां समन्तपञ्चकमिति पुण्यं तत्परिकीर्तितं येन लिङ्गेन यो देशो युक्तः समुपलक्ष्यते तेनैव ना
म्ना तं देशं वाच्यमाहुर्मनीषिणः १२ ॥श्रीरामायनमः॥

तेनतो दितः प्रेरितः ३ रौधिरान् रुधिरपूर्णान् ४ रुधिरेण पितॄणां तर्पणात्स्ववधिपि हिंसापि त्राद्युद्देशेनैव कर्तव्येत्युचितं ५ क्रोधवशे सुशस्त्रनिक्षेपादिति भावः ६ ७ ८ ९ निषि
षिधुः निषिद्धवन्तः अक्षराधिक्यमार्षं त्र्यम्पासलोपो वाऽऽर्षः । निषिषिधुरिति पाठे शशासुः हिंसातो विरमस्वेति । शिक्षितवन्त इत्यर्थः १२ ॥ छ ॥ छ ॥ छ ॥

श्रा०
२९

२२ मूर्द्धाः निम्नोन्नतकंटकिवादयः तद्रहिते २४ समंतेत्यादि समंतपंचकं समंतपंचकं तस्य संस्कृतं देशे पितॄणां मेरुकं तत्र समंततः शब्दस्य व्यवहार्थ दर्शयति अष्टादशेति एकीभावेन आगताः समन्तात् समंतः संयुक्तद्विजाः तादिविधिस्मात् निधनं समंततः गताः इति हेतुः समेत्य तं द्विजास्ताश्च तत्रैव निधनं गताः सविकल्पं तं समेताः तां संज्ञां तत्र नाशो यत्र सर्थः एतत् एवं प्रकारेण अभिनिर्वृत्तं २५ १६

अन्तरे चैव संप्राप्ते कलिद्वापरयोरभूत् समन्तपंचके युद्धं कुरुपाण्डवसेनयोः १३ तस्मिन्परमधर्मिष्ठे देशे भूदोषवर्जिते अष्टादश समाजग्मुरक्षौहिण्यो युयुत्सया समेत्य तं द्विजास्ताश्च तत्रैव निधनं गताः एतन्नामाभिनिर्वृत्तं तस्य देशस्य वै द्विजाः १५ पुण्यश्च रमणीयश्च स देशो वः प्रकीर्तितः तदेतत्कथितं सर्वं मया ब्राह्मणसत्तमाः १६ यथा देशः स विख्यातस्त्रिषु लोकेषु सुव्रताः ऋषय ऊचुः अक्षौहिण्य इति प्रोक्तं यत्त्वया सूतनन्दन एतदिच्छामहे श्रोतुं सर्वमेव यथातथं १७ अक्षौहिण्याः परीमाणं नराश्वरथदन्तिनां यथावच्चैव नो ब्रूहि सर्वं हि विदितं तव १८ सौतिरुवाच एको रथो गजश्चैको नराः पंच पदातयः त्रयश्च तुरगास्तज्ज्ञैः पत्तिरित्यभिधीयते १९ पत्तिं तु त्रिगुणामेतामाहुः सेनामुखं बुधाः त्रीणि सेनामुखान्येको गुल्म इत्यभिधीयते २० त्रयो गुल्मा गणो नाम वाहिनी तु गणास्त्रयः स्मृतास्तिस्रस्तु वाहिन्यः पृतनेति विचक्षणैः २१ चमूस्तु पृतनास्तिस्रस्तिस्रश्चम्वस्त्वनीकिनी अनीकिनीं दशगुणां प्राहुरक्षौहिणीं बुधाः २२ अक्षौहिण्याः प्रसंख्यानं रथानां द्विजसत्तमाः संख्या गणिततत्त्वज्ञैः सहस्राण्येकविंशतिः २३ शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः गजानां च परीमाणमेतदेव विनिर्दिशेत् ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु नराणामपि पंचाशच्छतानि त्रीणि चानघाः २५ पंचषष्टिसहस्राणि तथाश्वानां शतानि च दशोत्तराणि षट्प्राहुर्यथावदिह संख्यया १६ एतामक्षौहिणीं प्राहुः संख्यातत्त्वविदो जनाः यां वः कथितवानस्मि विस्तरेण तपोधनाः २७ ॥ ॥ ॥छ

पदातयः परिमिताः त्यादि गणनानां संख्यादानं ११९ अक्षौहिण्याः परिमाणं स्वाद्यक्षौहिणीगजैः २० ८ ७० रथैश्च २१ ८ ७० हयैः ६५ ६१० पंचघ्ने २० ९३ ५० श्वपदाः

रामः
२९

९

२१

पिंडिताः एकीभूताः संधिगाथः २८ ३१ द्रौणिः अश्वत्थामा हार्दिक्यः कृतवर्मा गौतमः कृपाचार्यः ३२ पर्वसंग्रहं वक्तुं प्रतिजानीते यत्त्विति शौनके त्यादिना । हे शौनक हे बृहन्मखव्रते इष्टिर्याति विषयाणां सूचना
वृत्तः तेषु दृष्टान्तत्वेन विदितः शौनकवृत्तान्त आदिमन्त्रे णारीहणादिमन्त्रे णारीहणादिवृत्तान्ते तव सत्रे यत्तभारताख्यानं मया श्रुतं तत्र जनमेजयस्य सत्रे व्यासशिष्येण कथितमिति सत्रेण संबंधः ३२
तत्सर्पसत्रे जनमेजयं प्रति यद्दिष्टं पापनेनोक्तं तदेव शौनकं प्रति सूतेन वक्तुं प्रतिज्ञातं तत्र यौष्यं पौलोमम् आस्तीकं च वक्ति किमिति सद्वृत्तिज्ञानम् उच्यते सूतेनेति चेत् । अत्राह कथितमिति । सत्रे व्यासशि
ष्येणापत्नाथितं तत्र भारते पौष्यं पौलोमं आस्तीकं च महीक्षितां यशोवीर्यं च वक्तुमिति शेषः आदितः स्मृतमिति योजना । स्मरणं तु विस्तरार्थं ग्रंथत्रयस्य भावः न हि ज्ञानार्थी ग्रहे वाभिगच्छेत् समिसा

एतया संख्यया ह्यासन् कुरुपांडवसेनयोः अक्षौहिण्यो द्विजश्रेष्ठाः समिताष्टादशैव तु २८ समेतास्तत्र वै देशे तत्रैव निधनं गताः कौरवान् कार
णं कृत्वा कालेनाद्भुतकर्मणा २९ अहानि युयुधे भीष्मो दशैव परमास्त्रवित् अहानि पंच द्रोणस्तु ररक्ष कुरुवाहिनीं ३० अहनी युयुधे
द्वे तु कर्णः परबलार्दनः शल्योर्द्धदिवसं चैव गदायुद्धमतः परं ३१ तस्यैव दिवसस्यांते द्रौणिहार्दिक्यगौतमाः प्रसुप्तं निशि विश्वस्तं जघ्नुर्यौ
धिष्ठिरं बलं ३२ यत्तु शौनक सत्रे ते भारताख्यानमुत्तमं जनमेजयस्य तत्सत्रे व्यासशिष्येण धीमता ३३ कथितं विस्तरार्थं च यशो वीर्यं महीक्षितां
पौष्यं तत्र च पौलोममास्तीकं चादितः स्मृतं ३४ ॥ ॥ ॥ ॥ ॥ छ

तिः श्रौत्रिपर्वकृत्स्नं निर्दिष्टं च विषयामर्ष यन्तीत्येवमादिश्लोकेन गुरुसेवामाहात्म्यं गुरूणां च माहात्म्यं पञ्चादीनां विद्यार्थित्वं च निरूपणीयं तेषु अन्नमात्राभावेपि विद्यानैवोदेतुमर्हतीति निरुद्धयमात्राचार्येणाश्वा
ख्यापिकामुखेनैव पौष्यगुरुशुश्रूषामाहात्म्यं पौलोमे भार्गवाणां गुरूणां महामाहात्म्यमुक्तं । आस्तीके जरत्कारोः प्रतिपत्नीगार्हस्थ्यात् सा कृतार्थत्वदर्शनेन पञ्चादीनामाख्यापकानामपि विद्यां
गत्वा तत्तं वि विदिषन्ति यज्ञेनेत्यादिश्रुतेः न स्नान्महोपनिषदारंभे एतत्त्रयकथनमावश्यकमिति । अत्र ख्यापिकामुखेन कथ्यमानो गहनोऽप्यर्थः सुग्रहो भवतीत्यभिप्रेत्य महीभृतां यशो वीर्यं चा

आ०
३०

मोक्षिभिर्मोक्षार्थिभिर्नरैः अभिपन्नं शरणीकृतं वैराग्यमिव यथा परवैराग्यस्य नान्यत्पारलौकिकं फलं कैवल्यं एवमेतच्छ्रवणस्यापीतिभावः ३५ आत्मेति आत्मज्ञानमेव स्वतः पुरुषार्थ इति आत्मैव स्वतः प्रियं वेदितव्यं तत्प्रमाणस्य तत्त्वावेदकत्वात् प्रमातृज्ञानं तु सर्वं पुरुषसंस्काराहारकर्मणां यथोक्तं भट्टपादैः सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते। परांगं चात्मविज्ञानादन्यत्रेत्यवधार्यतामिति। प्रधानार्थः मुख्य वाक्यप्रयोजनः ३६ ३७ कविभिः काव्यकर्तृभिः व्यासोच्छिष्टं जगत्सर्वमिति प्रसिद्धेस्तेषामद्भुतकाव्यरचने इदमेव तत्त्वनमित्यर्थः अभिजातः कुलीनः ३८ उत्तमा वाग्माधुर्यवृद्धिर्येषां विं

विचित्रार्थपदाख्यानमनेकसमयान्वितं अभिपन्नं नरैः प्राज्ञैर्वैराग्यमिव मोक्षिभिः ३५ आत्मेव वेदितव्येषु प्रियेष्विव हि जीवितं इतिहासः प्रधानार्थः श्रेष्ठः सर्वागमेष्वयं ३६ अनाश्रित्येदमाख्यानं कथा भुवि न विद्यते आहारमनपाश्रित्य शरीरस्येव धारणं ३७ इदं कविवरैः सर्वैराख्यानमुपजीव्यते उदयप्रेप्सुभिर्भृत्यैरभिजात इवेश्वरः ३८ इतिहासोत्तमेऽस्मिन्नर्पिता बुद्धिरुत्तमा स्वरव्यंजनयोः कृत्स्ना लोकवेदाश्रयेव वाक् ३९ अस्य प्रज्ञाभिपन्नस्य विचित्रपदपर्वणः सूक्ष्मार्थन्याययुक्तस्य वेदार्थैर्भूषितस्य च ४० भारतस्येतिहासस्य श्रूयतां पर्वसंग्रहः पर्वानुक्रमणी पूर्वं द्वितीयः पर्वसंग्रहः ४१ ॥ ॥ ॥ ॥ ॥ ॥

व्याख्यातः करणवृत्तिः ३९ प्रज्ञया अभिपन्नं प्राप्तं तस्य ४० पर्वणां उपक्रमोपसंहारैकरूप्यादिना एकमर्थं पूरयंति कात्स्न्येन प्रतिपादयंतीति तानि पर्वाणि अवांतरप्रकरणानि तेषां संग्रहः समस्य विविच्य ग्रहो यस्मिन् स पर्वसंग्रहो द्वितीयं पर्व ४१ ॥ ॥ श्रीरामजीसहाय॥ ॥श्रीरामाय नमः॥ ॥श्रीरामाय नमः॥ ॥ श्रीकालभैरवाय नमः॥ ॥ राम०

पर्वपंचकतात्पर्यमुक्तं। तत्रालौकिककर्मधाधामपुक्तं तत्कर्मिणो देवभावं प्राप्यापि हन्तुं लभंते इत्यादौ अंशावतरणोत्कर्षप्रेयं अंशावतारणं देवानां भूमौ भागशोऽवतरणं आदिः प्रथमंपर्वसर्थः तेन
एवं क्रमन्तत्र जिज्ञासं गच्छन्ते सम्भवे अत्र लब्धजन्मनामपि मन्ते षां निपमेन हानितिः किं तत्र सर्पनागादिनाम सपोनिधामिरपि कमविशादवतो उक्तं समर्थैतत्राप्पृथ्वीस्थितो वंधनप्रमापेनदुर्गतीति
जातपदर्शितं। अष्टमे। तथा कामकाः स्त्रियो वंचनपिधानपंतो सविश्वसनीयास्ताइति हैडिंबे नवमे। दर्शितं। शब्दूकारमहस्यापि शरीरस्यार्थे परप्राणानपि यामराः वसहमादत इति वक

मा२

पौष्यंपौलोममास्तीकमादिरंशावतारणं ततः संभवपर्वोक्तमद्भुतंरोमहर्षणं ४२ दाहोजतुगृहस्यात्रहैडिंबंपर्वचोच्यते ततोबकवधः पर्वपर्वचैत्ररथंततः ४३ ततः स्वयंवरोदेव्याः पांचाल्याः पर्वचोच्यते क्षात्रधर्मेणनिर्जित्यततोवैवाहिकंस्मृतं ४४ विदुरागमनंपर्वराज्यलंभस्तथैवच अर्जुनस्यवनेवासः सुभद्राहरणंततः ४५ सुभद्राहरणादूर्ध्वंज्ञेयंहरणहारिकं ततः खांडवदाहाख्यंतत्रैवमयदर्शनं ४६ सभापर्वततः प्रोक्तंमंत्रपर्वततः परं जरासंधवधः पर्वपर्वदिग्विजयंतथा ४७ ॥ छ ॥ छ ॥

प्र२

वधे दशमे सूचितं ततः कष्टतरं जितमप्रधानाः प्राणिनः प्रासवंतीति पृथवंधे लोकानुर्मचिन्ताब्राह्मणो निर्वेदमापाल्लस्तहतः कृतेन जित्वा सर्वक्षत्रियहं हितः एवमसङ्गोपि ततः
ख्यानतासयामित्यनेनराज्यमानांसा। लिकानांचरागितिः परीक्षणीयाप्युगे ४२ चैत्ररथं त्र्यंगारपर्णविजितं पर्व ४३ ४४ विदुरा
गमनेराज्यलंभश्चेकंपर्व लिंभोलाभः ४५ हरणंदायः पारिवर्हमितियावत्तत्प्रहारिकासमानपनं खांडवदाहोमयदर्शनंचैकंपर्व ४६ सभापर्वसभारंभणपर्वमंत्रोराज्ञस्सार्थीः मंत्रणं ४७

४८ अनुद्यूतं पर्वद्यूतं ४९ अभिगमनं तथ मीगमनं ५० ५१ यक्षयुद्धमीमेत ५२ समस्यामहावस्थानं ५३ घोषयात्राकौरवाणां। मृगस्वप्नोद्भवं ततस ५४ ऐंद्रद्युम्न मिस त्र क्रमोन
विवक्षितेः संख्यापांतास पीत समस्यां नगरिंचे चेदंपर्व ५५ ५६ कुंडलाहरणं करणस्य कुंडला आरणेयं आरणी हरणं ब्राह्मणस्य धर्मेण। प्रवेशो विराटनगरे। समयस्य प्रतिज्ञातस्य पाक्प्रवेशाद्यर्थ

पर्वदिग्विजयाह्वंच राजसूयिकमुच्यते ततश्चार्घाभिहरणं शिशुपालवधस्ततः ४८ द्यूतपर्व ततः प्रोक्तमनुद्यूतं ततः परं ततश्चारण्यकंपर्व
किर्मीरवधएवच ४९ अर्जुनस्याभिगमनंपर्वज्ञेयमतः परं ईश्वरार्जुनयोर्युद्धंपर्वकैरातसंज्ञितं ५० इंद्रलोकाभिगमनंपर्वज्ञेयमतः परं न
लोपाख्यानमपिचधर्मिष्ठंकरुणोदयं ५१ तीर्थयात्राततः पर्वकुरुराजस्यधीमतः जटासुरवधः पर्वयक्षयुद्धमतः परं ५२ निवातकव
चैर्युद्धंपर्वचाजगरंततः मार्कंडेयसमास्याचपर्वानंतरमुच्यते ५३ संवादश्चततः पर्वद्रौपदीसत्यभामयोः घोषयात्राततः पर्वमृगस्वप्नो
द्भवंततः ५४ व्रीहिद्रौणिकमाख्यानमैंद्रद्युम्नंतथैवच द्रौपदीहरणंपर्वजयद्रथविमोक्षणं ५५ पतिव्रतायामहात्म्यंसावित्र्याश्चैवमद्भुतं
रामोपाख्यानमत्रैवपर्वज्ञेयमतः परं ५६ कुंडलाहरणंपर्वततः परमिहोच्यते आरणेयंततः पर्ववैराटंतदनंतरं पांडवानांप्रवेश
श्चसमयस्यचपालनं ५७ कीचकानांवधः पर्वपर्वगोग्रहणंततः अभिमन्योश्चवैराट्याःपर्ववैवाहिकंस्मृतं ५८ उद्योगपर्वविज्ञेयमतऊर्ध्वं
महाद्भुतं ततः संजययानाख्यंपर्वज्ञेयमतःपरं ५९ प्रजागरंतथापर्वधृतराष्ट्रस्यचिंतया पर्वसानत्सुजातंवैगुह्यमध्यात्मदर्शनं ६०॥ध

सं ५७ अभिमन्योः अर्जुनपुत्रस्य ५८ संजययानंपांडवान्प्रति ५९ ६० श्रीरामायनमः श्रीकालभैरवायनमः श्रीकाशीविश्वेश्वरायनमः। छ

भगवद्यानं कौरवान्प्रति ६१ ६२ विवादपर्व कर्णस्य कर्णसंवादरूपं पर्व ६४ संख्याभीष्मकृता उलूकदूतस्य पांडवान्प्रति आगमनं ६५ अभिषेचनं सेनापतेः ६६ जंबूखंडविनिर्माणं

यानसंधिस्ततः पर्वभगवद्यानमेव च मातलीयमुपाख्यानं चरितं गालवस्य च ६१ सावित्रं वामदेव्यं च वैन्योपाख्यानमेव च जामदग्न्यमुपाख्यानं पर्व षोडशराजिकं ६२ सभाप्रवेशः कृष्णस्य विदुलापुत्रशासने उद्योगः सैन्यनिर्याणं श्वेतोपाख्यानमेव च ६३ ज्ञेयं विवादपर्वात्र कर्णस्यापि महात्मनः निर्याणं च ततः पर्व कुरुपांडवसेनयोः ६४ रथातिरथसंख्या च पर्वोक्तं तदनंतरं उलूकदूतागमनं पर्वामर्षविवर्द्धनं ६५ अंबोपाख्यानमत्रैव पर्व ज्ञेयमतः परं दिव्यं चक्षुर्ददौ यत्र संजयाय महामुनिः भीष्माभिषेचनं पर्व ततश्चाद्भुतमुच्यते ६६ जंबूखंडविनिर्माणं पर्वोक्तं तदनंतरं भूमिपर्व ततः प्रोक्तं द्वीपविस्तारकीर्त्तनं ६७ पर्वोक्तं भगवद्गीता पर्व भीष्मवधस्ततः द्रोणाभिषेचनं पर्व संशप्तकवधस्ततः ६८ अभिमन्युवधः पर्व प्रतिज्ञापर्व चोच्यते जयद्रथवधं पर्व घटोत्कचवधस्ततः ६९ ततो द्रोणवधः पर्व विज्ञेयं लोमहर्षणं मोक्षो नारायणास्त्रस्य पर्वानंतरमुच्यते ७० कर्णपर्व ततो ज्ञेयं शल्यपर्व ततः परं ह्रदप्रवेशनं पर्व गदायुद्धमतः परं ७१ सारस्वतं ततः पर्व तीर्थवंशानुकीर्त्तनं अतऊर्ध्वं सुबीभत्सं पर्व सौप्तिकमुच्यते ७२ ऐषीकं पर्व चोद्दिष्टमत ऊर्ध्वं सुदारुणं जलप्रदानिकं पर्व स्त्रीविलापस्ततः परं ७२

जंबूद्वीपसंनिवेशः भूमिपर्वणि पवद्वीपविस्तारकीर्त्तनम् ७ ६८ प्रतिज्ञा जयद्रथवधार्थं ६९ ७० ह्रदप्रवेशनं दुर्योधनस्य गदायुद्धं तस्यैव भीमेन ७१ ७२

कुरूणामैर्ष्ठदेहिकं आद्यंपर्वचर्वाकस्यब्रह्मरूपिणोऽक्रमस्यविप्रक्रोधात्तन्निग्रहः शांतिपर्व ७४ शांतिपर्वहिद्वाभ्यांशांतीति ७५ ७६ भामयेतिपाठो । तत्रोऽमयत्रापिहलमयेसर्थः ७७ अनुशा
सनेधर्माधर्मोपदेशः तत्संबंद्धमानुशासनिकं ७८ शाखांतरस्थेशाखांतरेपदप्रेक्षावशात्पद्यतेनतत्विलमितिवैदिकोप्रसिद्धिः यथावक्तृचानोश्रीसूक्तपेथासूक्तादिनांसंहिताकालेपाठोदृश्य

आद्यपर्वततोज्ञेयंकुरूणामौर्ध्वदेहिकं चार्वाकनिग्रहः पर्वरक्षसोब्रह्मरूपिणः ७४ अभिषेचनिकंपर्वधर्मराजस्यधीमतः प्रविभागोगृहाणां
चपर्वोक्तंतदनंतरं ७५ शांतिपर्वततोयत्रराजधर्मानुशासनं आपद्धर्मश्चपर्वोक्तंमोक्षधर्मस्ततःपरं ७६ शुकप्रश्नाभिगमनंब्रह्मप्रश्ना
नुशासनं प्रादुर्भावश्चदुर्वासः संवादश्चैवमायया ७७ ततः पर्वपरिज्ञेयमानुशासनिकंपरं स्वर्गारोहणिकंचैवततोभीष्मस्यधीमतः ७८
ततोश्वमेधिकंपर्वसर्वपापप्रणाशनं अनुगीताततः पर्वज्ञेयमध्यात्मवाचकं ७९ पर्वचाश्रमवासाख्यंपुत्रदर्शनमेवच नारदागमनं
पर्वततः परमिहोच्यते ८८ मौशलंपर्वचोद्दिष्टंततोघोरंसदारुणं महाप्रस्थानिकंपर्वस्वर्गारोहस्ततः पर्वपुराणंखिलसंज्ञितं वि
स्नुपर्वशिशोश्चर्याविष्णोःकंसवधस्तथा॥ ८२ ॥ ॥ ॥ ॥ ॥

तेएवमस्मिन्निति हासेपसुराणांतरस्थेभाकांक्षावशात्य जेततोखिलंहरिवंशाख्यमितिसाहहरिवंशइति । अतएवास्यखिलस्यपुराणमिति विशेषणंतथाहिअत्रविस्नुचर्या विष्णुपुराणे
क्तासाकल्येनदृश्यते ८२ ॥श्रीरामायनमः॥ ॥श्रीरामजी: ॥ ॥ ॥

एवं भविष्यपुराणकथा च खिलेष्वेवाद्भुतं महदिति २ यथावाक्यं अद्भुतं तत्प्रकारं वाराहनारसिंहवामनप्रादुर्भावादि केलासयात्रात्रिपुरवधांतं एतत्सर्वपर्वशतं एकैकस्मिन्महाप्रकरणे अवांतरप्रकरणानामंत
भविविवक्षयाऽष्टादशसंख्यत्वेन लोमहर्षणिनोक्तं ८३ ८४ तत्रैकस्मिन्महापर्वणि कत्यवांतरपर्वाणि तेषु च के के ऽर्थाः प्रतिपाद्याः एकैकस्मिन्महापर्वणि श्लोकसंख्या च का इत्येतत्सूत्रु
मुपक्रमते समास इति। अयं द्वितीयोऽनुक्रमणस्याध्यायः सच भारतस्य समासः संक्षेपपर्वेत्यर्थः अत्र प्रत्नाते द्वितीयेऽध्याये पर्वसंग्रहः एवं पौष्यादिभिश्च मयदर्शनांतैः सप्तदशभिश्चैवं एकोनविं

भविष्यपर्व चाप्युक्तं खिलेष्वेवाद्भुतं महत् एतत्सर्वशतं पूर्णं व्यासेनोक्तं महात्मना ८३ यथावत्सूतपुत्रेण लोमहर्षणिना ततः उक्तानि नैमिषा
रण्ये पर्वाण्यष्टादशैव तु ८४ समासो भारतस्यायं तत्रोक्तः पर्वसंग्रहः पौष्यं पौलोममास्तीकमादिरंशावतारणं ८५ संभवो जतुवेश्माख्यं
हिडिंबवकयोर्वधः तथा चैत्ररथं देव्याः पांचाल्याश्च स्वयंवरः ८६ क्षात्रधर्मेण निर्जित्य ततो वैवाहिकं स्मृतं विदुरागमनं चैव राज्यलंभ
स्तथैव च ८७ वनवासोऽर्जुनस्यापि सुभद्राहरणं ततः हरणाहरणं चैव दहनं खांडवस्य च ८८ मयस्य दर्शनं चैव आदिपर्वणि कथ्यते॥ ॥

शत्या पर्वण्याऽऽदित्वं चाप्यनध्यायप्यात् किंतु सर्वेषामादित्वनिर्दिहिकायेत इति। एवं सभादीनामपि संज्ञातत्वदेकैकार्थवाधामा ह्योध्यात्रत्रापसंग्रहः आदौ सभारण्यविराटउद्योगभीष्मद्रोणसूचिज
शल्यसौप्तिके स्त्रीशांतिदानाश्वमेधाश्रमवासिमौसलमहाप्रस्थानिकस्वर्गारोहेषु च पर्वाणि ४ संकल्पवारोह्लीधट्ककत्रिधीः वाह्नदुद्धित्रिभूम्यामाश्लेतिशतक्रमादिति ८५ ८६ ८७ ८८

पे

अत्रपाधामततत्तन्नदाख्यानतासर्पाणांशोश्यांसंगृहीतानिकुद्मवद्रूपवद्भूत्वा यत्नोपः सेवनेगृहांतंविषादेवत्ताश्चारगन्धांतीसाहपौध्यक्तत्रवलोनपार्थनासाध्यः सचेदेवनतादितः अम्येतिम
दुतांपश्चाद्दृत्तंकेतक्षकोपथाशाद्रो हत्तंधनतोवह्निपुलोमानाववापतुः शापमसूद्दत्तिपनः पौलोमेतत्पर्यंगीतं ९० लोकान्मंत्रान्महेद्राख्याःस्रुत्रीयमद्भुतं। तक्षकोनसेनस्थाविसास्तीकेचव
र्णितं। अन्नाध्यमपिमात्रोक्तंसद्योयोनानतिष्ठतिमस्रीकुर्वंतेविप्रावेदाश्चाहिगणायथा। मिथ्यावादेनयेदासीकृतास्तस्तेनतिंलिका। संततिंनाशयसेवगाहसा। निवयत्नगान। आयुर्हानिर्म
ति१

पौष्येपर्वणिमाहात्म्यमुत्तंकस्योपवर्णितं ८९ पौलोमेभृगुवंशस्यविस्तारः परिकीर्त्तितः आस्तीकेसर्वनागानांगरुडस्यचसंभवः ९० क्षी
रोदमथनंचैवजन्मोच्चैःश्रवसस्तथा यजतः सर्पसत्रेणराज्ञः पारीक्षितस्यच ९१ कथेयमभिनिर्वृत्ताभारतानांमहात्मनां विविधा
संभवाराज्ञामुक्ताः संभवपर्वणि ९३ अन्येषांचैवशूराणामृषेर्द्वैपायनस्यच अंशावतारणंचात्रदेवानांपरिकीर्त्तितं ९४ दैत्या
नांदानवानांचयक्षाणांचमहौजसां नागानामथसर्पाणांगंधर्वाणांपतत्रिणां ९५ छ ॥ छ ॥ छ ॥ छ ॥

हान्शोकोहिंसायांचाभिसंभ्रमः हरोरिवभवंसेवंदारसक्तस्यदुर्मतेप्रजपायैत्कमर्पिणांछेत्तंदाराणकोऽतिवेरत्नदाजात्का नरिवकापंनिधवज्रेहहात। नत्वामत्तंशास्त्रविंधोः समंलब्धंसण
सैः आस्वादितंविस्मुभक्तेः सौरनंमैः। स्त्रियानितैः देवपंक्तौमधांलेभेदैसादेहलिदासममसचिनश्चित्रेंकुम्पींकाश्यामेवमहेश्वराणन् ९१ ९२ स्त्रियामाद्यंतिर्सितोपीसक्तंप्या
स्यजन्मानि। देवासुरानरेषुचवसंतीसंशावतारणो ९३ असत्यस्यापिपापस्यविपाकमतिदारुणं। अनृतमनाचिंत्रसमनूर्णीमांरव्यहुंदुभो ९४ ९५ ॥ ॥छछ॥ राम०
व२

वै २

शिष्टानांचैतमस्तुष्टिर्धर्मेद्वामारापमश्रुतेशकुंतलामीहमानंदुष्यंतप्रमतोयथा ८६ पितुर्द्ध स्वंहरत्पुत्रः श्रेयोलक्ष्मींचविदतिभीष्मवस्रहत्वन्मानासंतंतिचपपातिवग ९७ ९९ १०० क्षेत्र
बीजे विनाद्गोरगाश्चष्ठुप्रवपुजनिः केवलात्कर्मरागाइतिश्रीकंसंभवपर्वरिगि १ विषवार्यग्निभिर्लब्धाघातपंतिस्मवांधवान ईश्वरस्तानवसुक्तंजातषवयर्वरिगि २ ३ ४ अविश्वास्या

अन्येषांचैवभूतानांविविधानांसमुद्भवः महर्षेराश्रमपदेकण्वस्यचतपस्विनः ९६ शकुंतलायांदुष्यंताद्भरतश्चापिजज्ञिवान यस्यलोकेषुनाम्ने
दंप्रथितंभारतंकुलं ९७ वसूनांपुनरुत्पत्तिर्भागीरथ्यांमहात्मनां शंतनोर्वेश्मनिपुनस्तेषांचारोहणंदिवि ९८ तेजोंशानांचसंपातोभीष्मस्या
प्युत्पसंभवः राज्यान्निवर्तनंतस्यब्रह्मचर्यव्रतेस्थितिः ९९ प्रतिज्ञापालनंचैवरक्षाचित्रांगदस्यच हतेचित्रांगदेचैवरक्षाभ्रातर्यवीयसः
१०० विचित्रवीर्यस्यतथाराज्येसंप्रतिपादनं धर्मस्यनृषुसंभूतिरणीमांडव्यशापजा १ कृष्णद्वैपायनाच्चैवप्रसूतिर्वरदानजा धृतराष्ट्रस्यपां
डोश्चपांडवानांचसंभवः २ वारणावतयात्रायांमंत्रोदुर्योधनस्यच हितोपदेशश्चपथिधर्मराजस्यवीमतः ३ विदुरेणकृतोपत्रहितार्थम्लेच्छ
भाषया विदुरस्यचवाक्येनसुरुंगोपक्रमक्रिया ४ निषादाः पंचपुत्रेपाः सुप्तायाजतुवेश्मनि पुरोचनस्यचात्रैवदहनंसंप्रकीर्तितं पां
डवानांवनेघोरेहिडिंबायाश्चदर्शनं ५ एमएम॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥

डिंबा १

ः स्त्रियः कामातद्यानयंस पिवाधवानइतिदर्शितव्यासो हिंववधपर्वरिगि ५ छ ५ छ ५ छ ५ छ ५ छ ५ छ ५ छ ५ छ ५ छ ५ छ ५॥
डं १

यस्मिन्नोद्वेहेपोतापिवसेत्तुएपतत्मोजनः उपकुर्यान्निमिसेवमकंकंवककवधेपिच ७ ९ ब्राह्मणान्नयहादेवकृत्वंजपतिनाम्यथा।इतितासहशंता दाहचैवरथेमनिः स्पर्सिकृत्यां।नयनीनरंशखुंच
लवान।वसिष्ठस्यप्रसादेनराजासंवरणोपथावसिष्ठस्यशतंपुत्रान्नाशयामासलौकिकः नैनंचवाधिरेभ्रस्सहसाहालालापसोक्लात।पाद्रः रक्ला दिनोदेहंमिसकृति। नतकृमो।नशशायवसि

तत्रैववहिडिंबस्यवधोभीमान्महाबलात ६ घटोत्कचस्यचोत्पत्तिरत्रैवपरिकीर्तिता महर्षेर्दर्शनंचैवव्यासस्यामिततेजसः ७ तदाज्ञयैकचक्रा
यांब्राह्मणस्यनिवेशने अज्ञातचर्ययावासोयत्रतेषांप्रकीर्तितः ८ बकस्यनिधनंचैवनागराणांचविस्मयः संभवश्चैवकृष्णायाधृष्टद्यु ९
म्नस्यचैवह ९ ब्राह्मणात्समुपश्रुत्यव्यासवाक्यप्रचोदिताः द्रौपदीप्रार्थयंतस्तेस्वयंवरदिदृक्षया। १० पाञ्चालानभितोजग्मुर्यत्रकौ ९
तूहलान्विताः कृटस्यधात्रीणोद्रोणोपांडवान्वति १२ अंगारपर्णंनिर्जित्यगंगाकूलेर्जुनस्तदा संख्यंकृत्वाततस्तेनतस्मादेवसंश्रु ९
त्र१

शेहिपत्रघ्नमपिकोशिकं।कौशिकेत्वौर्यतयस्यीराधेयैर्मगृहते खलेचवाचिमाधुर्यवीजसंस्कारसंकरान।ब्राह्मणोगर्भसंछोपिमाननीयोमनीषिणां।औवोंहिमाभरूरूछः कृत्रमंधमचीकर ९
श्लो०५१

लोकवेदविरोधेपि मातृवाक्यं नलंघयेत। इत्येकस्यो निमित्तं पंचेसकं सपंचोनन वेदविरुद्धं यमेकस्यावहुभर्तृता नैकस्यैवबहवोभर्तारो भवन्तीति चश्रुतौ नैकस्यैवबहवः सहपतयइति। तस्माल्लेका
ह्वेयतो विरुद्धे इतिवक्तृत्वं विशेषः अग्नौ संचक्रमास्वाप्य हव्यमेतिमतुष्यते। अप्पल्लिंग्रकैः ह्यागुहत्सोयो विदितसपि। अग्नौ धात्राह्वतिः सम्यगादि समुपतिष्ठति। आदि सात्ज्ञापतेर्हह इरन्नं
ततः प्रजाः द्रौणोवह्नि च वक्तौ स्थोयोषिदग्नेर्भावतः अग्नित्रयो छिन्नासीनाम् स्थो पित्रो भावतः अग्निद्यो [illegible] स्थितादेवानस्पृशंति। क्षितिं हिते। देवज्ञाः पार्थमादेशात्पूर्वमग्नि विवर्तु

तापसमथवासिष्ठमौर्वं चाख्यानमुत्तमं भ्रातृभिः सहितः सर्वैः पांचालानभितो ययौ १३ पांचालनगरे वापि लक्ष्यं भित्वा धनंजयः द्रौपदीं लब्ध
वान्पत्नीं मध्ये सर्वमहीक्षितां १४ भीमसेनार्जुनौ यत्र संरब्धान्पृथिवीपतीन् शल्यकर्णौ च तरसा जितवंतौ महामृधे १५ दृष्ट्वा तयोश्च तद्वीर्यमप्र
मेयममानुषं शंकमानौ पांडवांस्तान् रामकृष्णौ महामती १६ ॥ ५ ॥ ६ ॥

ना:। द्रौपदीत्वमात्रं र विवर्त्ये होमिथुनत्वमुपागतं एकाग्निनार्थं पत्नी द्रुपदसता विकौ। सर्वे सर्वात्मकादेवा विराजो वृषपवापतः सर्वे एव समाः सर्वे नंता रक्षितिहि वेदगीः ततेषांश्च भिचारो लिनवेस्यमौ कथं
पिता पुत्रौ संतौ कुंतीमपयातां तो सरोत्नमौ। द्रौपदी देवजा पार्थदेवजा यदि संयुजने नते षांमत्र दोषो स्तिरेवा एवहिते स्वयं। अपतेनहवे देवा स्यापंगच्छन्ति सर्वथाः तस्माद्धतै देवभावं प्राप्यर्थ तं तिरेन सः एतद्दे
वाहि के व्यासोनानाख्यानो यदूहहगौः दर्शयामास लोकानां संशयस्यापनुत्तये १३ १४ १६ पी९

श्रा० ३५

प्राणमंतिजिघांसंतोप्यनुकूले विधातरि। पांडुपुत्रास्तान्निराकृत्य स्वकं विदुरागमे १७ पार्थवलाद्युधिष्ठिरस्तितान्वर्द्धयति केशवः निरस्ताः पांडवास्तानस्पंकीर्तिं चलेभिरे १८ एकात्मानोपिभिन्नांते
स्त्रीभिः संदोपसंदवनतस्मात्स्वसुखपिस्त्रीभि[illegible]नैसंभाषेनवुद्धिमान १९ विप्रार्थमिलयनज्ञात्वा प्यायदं द्वादशाब्दिकी दर्शितवान्व्यासआर्जुनमातीर्थयात्रया २० २१ नज्ञातीनां
वचः पेहत्वं दूरं श्रेयस्सुयागतेश्तावकस्मोविजयं स्वस्वस्राभ्महारथन।मातलस्यसुतां पार्थोधर्मतोभगिनीसंतोकथंजहार धर्मात्मापीतिचेन्नछगुणधर्ममत्मातस्वस्तोः सतोंभ्रातस्वसारौपदिशौनकः ससमाह्

तं१

जगमतस्तैः समागंतं शालांभार्गविवेश्मनि पंचानामेकपत्नीत्वे विमर्षोद्रुपदस्य च १७ पंचेंद्राणामुपाख्यानमत्रैवाद्भुतमुच्यते द्रौपद्यादेवविहितो वि
वाहश्चाप्यमानुषः १८ कृतेद्वयधनराष्ट्राणांपेषणांपांडवास्तुति विदुरागमस्य च तं धार्षिदर्शकेशवस्य च १९ खांडवप्रस्थवासश्च तथाराज्याईसर्ज्ज
नं नारदस्याज्ञया चैव द्रौपद्याः समयक्रियाः २० संदोपसंदयोस्तद्वदाख्यानं परिकीर्तितं अनंतरं चद्रौपद्यासहासीनं युधिष्ठिरं २१ अनुप्रवि
श्यविप्रार्थेफाल्गुनोगत्यचायुधं मोक्षपित्वागृहं गत्वा विप्रार्थं कृतनिश्चयः २२ समयंपालयन्वीरोवनंयत्रजगामह पार्थस्यवनवासे च उलूप्या
पथिसंगमः २३ पुण्यतीर्थानुसंयानं वभ्रुवाहनजन्मच तत्रैवमोक्षयामासपंचसोप्सरसः शुभाः २४ शापाद्ग्राहत्वमापन्ना ब्राह्मणस्य तपस्वि
नः प्रभासतीर्थे पार्थेन कृष्णस्य च समागमः २५ द्वारकायां सुभद्रा च कामयानेन भामिनी वासुदेवस्यानुमते प्राप्ता चैव किरीटिना २६ ॥ छ

व्यमिप्येपर्युसंवंधःश्छिघनांकथंतस्मान्नयोः स्वसृभ्रातृभावोभाक्तो विगोत्रयोः दांपत्यभावस्तत्पोर्मत्रलिंगात्सुस्फुटः आयाहीन्द्रपथिभिरीलितेभिर्यज्ञमिमंनोभागधेयंजुषस्व। नसांजकुममीठलस्थेवपो
षामाग स्तंपैतृष्वसेयइवपामिव। योषायसंमातलीयंथाभागः पितृष्वसुः पुत्रस्यैवं वयांतेशज्ञयसेवेत्तर्षिजंग २६ ॥ ॥ ॥ ॥

राम० ३५

मानद्यस्यापि जामात्रमानं संवर्द्धितधः स्वसर्हितेनार्जुनापापि तद्विज्ञानिवृत्तमयः २७ अभिमन्युमेवाधात्तेन [illegible] त्वांडवौषधिदानेन नीरोगं च कृतवस्था। देवोपि दैत्यदुःखा [illegible] मानुषादेस्तका
कथा। शरणीकरणीयोऽतः सर्वेदुःखापहो हरिः २८ भुजंगस्य अश्वसेनस्यापि त्राहरणादमुक्तस्य सकलंस्तकृतं तथा। विपोनाम् वध्यतः पुत्रान्जनपेन्मंदपालवत्। शार्ङ्गिकान्वतयोस्कन्नागमाता
र्जुनोमयं भवाग्निनर्तकमोतस्वीनेतान्शरणां व्रजेत ३० चतुराशीतिदेहमार्गे इत्यादिपर्वतासर्वसंक्षेपेणोपवर्णितं सभापर्वादिनासर्वमुच्यतः कथ्यतेधुना ३२ हानवेंद्रैणातष्टेन सभादत्ताद्

गृहीत्वाहरणां श्रासेकृष्णेदेवकिनंदने अभिमन्योः सुभद्रायां जन्मचोत्तमतेजसः २७ द्रौपद्यास्तनयानांच संभवोऽत्रप्रकीर्तितः विहारार्थंचगतयोः
कृष्णयोर्यमुनामनु २८ संप्राप्तिश्चक्रधनुषोः खांडवस्यचदाहनं मयस्यमोक्षोज्वलनाद्भुजंगस्यचमोक्षणं महर्षेर्मंदपालस्यशार्ङ्ग्यांतन
यसंभवः ३० इत्येतदादिपर्वोक्तंप्रथमंबहुविस्तरं अध्यायानांशतेद्वेतुसंख्यातेपरमर्षिणा सप्तविंशतिरध्यायाव्यासेनोत्तमतेजसा ३१ अ
ष्टौश्लोकसहस्राणिअष्टौश्लोकशतानिच श्लोकाश्चचतुराशीतिर्मुनिनोक्तामहात्मना ३२ द्वितीयंतुसभापर्वबहुवृत्तांतमुच्यते सभा
क्रियापांडवानांकिंकराणांचदर्शनं ३३ लोकपालसभाख्यानंनारदाद्देवदर्शितः राजसूयस्यचारंभोजरासंधवधस्तथा ३४ ॥ ॥

नामुवि। दिवीर्दैवीसमायज्ञश्चाप्यानस्याः शताधिकाततःशतगुणाश्चाष्टीलभ्यांविष्णोःसमर्चनात्राइसत्यानारदः पार्थयज्ञेशोऽर्चिदस्त्वचीकारतावहूर्वांयोक्ष्येयन्नतांछलेनापिनिर्दहेत। जरासंधंवे
नैतद्दर्शितंमुनिनामुने ३३ ३४ ७ ॥ ७ ॥ ७ ॥ ७ ॥

आ०
३६

३५ ३६ वित्तार्जनं मखायैव महतामिति दर्शयन् अचेदि विजयाद्यर्घ्यो राजसूयक्रतौ क्रियां तत्रैवार्घाभिहरणे विष्णुर्देवनृर्षिषु । आदौ पूज्यो यथा तद्वृष्ट्या सद्यो नश्येदिति गिरं । गोप्यः कामाद्भयात्कंसो
द्वेषाच्चैद्यादयो नृपाः तीव्रध्यानाद्धरेः साम्यं लेभिरे कीर्त्यते गवत्त तथा शूलपद्माद्याः योऽयं त्निगदानरानयथायरेयामुत्कर्षः पाषिनं धार्त्तराष्ट्रवत् ३७ कितवो द्यूतकारः ३८ द्रौपदीं तारयामासेत्य
न्वयो लान्वयः नवास्योनंतरः शत्रुघाते मगवर्जनं । क्रोधतुः शामनो ऊष्मामापपापितेना तः ३९ ज्ञात्वापि परिमाहात्म्यं न खलः खलतां त्यजेत् दृष्ट्वापि कृष्णमाहात्म्यं नैवाशाम्यत्सुयोधनः
हा१

पदीं३

।गिरिव्रजे निरुद्धानां राज्ञां कृष्णेन मोक्षणं तथा दिग्विजयोत्रैव पांडवानां कीर्त्तितः ३५ राज्ञामागमनं चैव सार्हणानां महाक्रतौ राजसूयेर्घसंवादे शि
शुपालवधस्तथा ३६ यत्र विभूतिं तां दृष्ट्वा दुःखामर्षान्वितस्य च दुर्योधनस्यावहासो भीमेन च सभातले ३७ यत्रास्य मन्युरुद्भूतो येन द्यूतमका
रयत् यत्र धर्मसुतं द्यूते शकुनिः कितवोजयत् ३८ यत्र द्यूतार्णवे मग्नां द्रौपदीं नौरिवार्णवात् धृतराष्ट्रो महाप्राज्ञः स्नुषां परमदुःखितां ३९
तारयामास तांस्तीर्णान् ज्ञात्वा दुर्योधनो नृपः पुनरेव ततो द्यूते समाह्वयत पांडवान् ४० जित्वा स वनवासाय प्रेषयामास तांस्ततः एतत्सर्वं सभा
पर्व समाख्यातं महात्मना ४१ अध्यायाः सप्ततिर्ज्ञेयास्तथा चाष्टौ प्रसंख्यया श्लोकानां द्वे सहस्रे तु पंच श्लोकशतानि च ४२ श्लोकाश्चैकाद
श ज्ञेयाः पर्वण्यस्मिन् द्विजोत्तमाः अतः परं तृतीयं तु ज्ञेयमारण्यकं महत् ४३ वनवासं प्रयातेषु पांडवेषु महात्मसु पौरानुगमनं चैव धर्म
पुत्रस्य धीमतः ४४ ॥श्रीराम॥ ॥ ॥ ॥ ॥ ॥

द्यूते द्यूतनिमित्तं ४० सत्यं सतां महासारो येन बद्धाः पराङ्मुखाः । वंचिताः अपि नो चेलुः समर्था अपि पांडवाः ४१ ४२ ४३ पौरानुगमनं पौरकर्तृकमनुगमनं ४४ ॥ पर्व०
३६

विद्यार्थिभास्करंयेजेनतुराज्यायधर्मराट्धर्मोयायभूर्वेयेद्देवंनराज्यायेतिदर्शयन्नवाजितः पृथिविरिपुंपद्मनाभंगलापतः पांडवानांप्रवसतांकिर्मीरोन्मथनंयथा ४५ उपदेशोहिमेरवीनांप्रकोपायनशांत
ये। भ्रातरंपथ्यवक्तारंयंपरेध्रुतराष्ट्रप्रवासयत ४६ ४७ ४८ ४९ शत्रुरुणवकरुत्सेत्स्यतीतिशापोत्सर्गः ५० अत्रधृतराष्ट्रसमीपेकथितइतिशेषः ५१ निकृत्याछलेन ५२

नां१ अन्नौषधीं च कृतेपांडवेनमहात्मना द्विजानांभरणार्थंचकृतमाराधनंरवेः ४५ धौम्योपदेशात्तिग्मांशुप्रसादादन्नसंभवः हितंचब्रुवतः क्षत्तुः परित्यागो
विवासनात् ४६ गमनंक्षत्तुःपांडुपुत्राणांसमीपगमनंतथा पुनरागमनंचैवधृतराष्ट्रस्यशासनात् ४७ कर्णप्रोत्साहनाच्चैवधार्तराष्ट्रस्यदुर्मतेः वन
स्थान्पांडवान्हंतुंमंत्रोदुर्योधनस्यच ४८ तंदुष्टभावंविज्ञायव्यासस्यागमनंद्रुतं निर्याणप्रतिषेधश्च सुरभ्याख्यानमेवच ४९ मैत्रेयागमनंचा
त्रराज्ञश्चैवानुशासनं शापोत्सर्गश्चतेनैवराज्ञोदुर्योधनस्यच ५० किर्मीरस्यवधश्चात्रभीमसेनेनसंयुगे वृष्णीनामागमश्चात्रपांचालानांचसर्व
शः ५२ श्रुत्वाशकुनिनाद्यूतेनिकृत्यानिर्जितांश्चतान् क्रुद्धस्यानुप्रशमनंहरेश्चैवकिरीटिना ५३ परिदेवनंचपांचाल्यावासुदेवस्यसंनि
धौ आश्वासनंचकृष्णेनदुःखार्तायाःप्रकीर्तितं ५३ तथासौभवधाख्यानमत्रैवोक्तंमहर्षिणा सुभद्रायाः सपुत्रायाः कृष्णेनद्वारकांपु
रीं ५४ नयनंद्रौपदेयानांधृष्टद्युम्नेनचैवह प्रवेशंपांडवेयानांरम्येद्वैतवनेततः ५५ धर्मराजस्यचात्रैवसंवादःकृष्णयासह संवादश्चतथाराज्ञाभी
मस्यापिप्रकीर्तितः ५६ समीपंपांडुपुत्राणांव्यासस्यागमनंतथा प्रतिस्मृत्याथविद्यायादानंराज्ञोमहर्षिणा ५७ ॥ ॥ ७

परिदेवनंविलापः ५३ महर्षिणाकृष्णेन ५४ ५५ ५५ ५५ ५५ ५५ ५५ ५५

५८ देवताप्रसन्नात्मदेवशत्रुविनाशये तद्विविदे येर्दत्ताश्वोनिवत्रघानार्जुनः स्वर्गान्त्यकामेकामिनीशापोदेहस्यैकचिह्नेन। पार्थस्येवोर्वशीशापः प्रच्छन्नवासमस्मीसतः ५९ ६० व्यसनंद्यूतज
नमनर्थं ६२ स्थितिः विपद्यपिमर्यादाप्रतिपालनं ६३ स्वेदुः स्वाधिकास्पश्येनेनशोकोयनोपनेइतीचश्वाविनोरज्ञानलोमशस्यानमद्भुतं। ६२ स्वर्गप्रवृत्तिः स्वर्गीयवृत्तांतः ६४ ६७ कामेष्टा

गमनंकाम्यकेचापिव्यासस्यनिर्गतेततः अस्त्रहेतोर्विवासश्चपार्थस्यामिततेजसः ५८ महादेवेनयुद्धंचकिरातवपुषासह दर्शनंलोकपालानांस्वर्गा
रोहणमेवच ५९ महेंद्रलोकगमनमस्त्रार्थंचकिरीटिनः यत्रचिंतासमुत्पन्नाधृतराष्ट्रस्यभूयसी ६० दर्शनंबृहदश्वस्यमहर्षेर्भावितात्मनः ।। यु
धिष्ठिरस्यचार्तस्यव्यसनेपरिदेवनंनलोपाख्यानमत्रैवधर्मिष्ठंकरुणोदयं दमयंत्याःस्थितिर्यत्रनलस्यचरितंतथा ६२ तथाक्षहृदयप्राप्तिस्त
स्मादेवमहर्षितः लोमशस्यागमस्तत्रस्वर्गात्पांडुसुतान्प्रति ६३ वनवासगतानांचपांडवानांमहात्मनां स्वर्गेप्रवृत्तिराख्यातालोमशेनार्जुनस्य
वै ६४ संदेशादर्जुनस्यात्रतीर्थाभिगमनक्रिया तीर्थानांचफलप्राप्तिःपुण्यत्वंचापिकीर्तितं ६५ पुलस्त्यतीर्थयात्राचनारदेनमहर्षिणा
तीर्थयात्राचतत्रैवपांडवानांमहात्मनां ६६ कर्णस्यपरिमोक्षोत्रकुंडलाभ्यांपुरंदरात् तथायज्ञविभूतिश्चगयस्यात्रप्रकीर्तिता ६७ आग
स्त्यमपिचाख्यानंयत्रवातापिभक्षणं लोपामुद्राभिगमनमपत्यार्थमृषेस्तथा ६८ ऋष्यशृंगस्यचरितंकौमारब्रह्मचारिणः जामदग्न्यस्यरामस्यच
रितंभूरितेजसः ६९ कार्तवीर्यवधोयत्रहैहयानांचवर्ण्यते प्रभासतीर्थेपांडूनांवृष्णिभिश्चसमागमः ७० ॥ ॥ ॥ ॥

स्त्यस्य ६८ क्रोधीपुत्रात्कलत्रंचहंतिलोकांश्चमृगीशः जमदग्निः सपुत्रोत्रनिदर्शनमुदीरितं ६९ तीर्थयात्राखलवधोसमानाविति दर्शयन्। यथार्थतीर्थयात्रांतेजरामस्यवधादिकं ७० ॥

देवत्वंदेवतानांहिब्राह्मणाच्यवनोपत्नःशर्यातिपज्ञेनामसौकृतवान्सोमपापिनौसोमस्यपीतंपानंतहूनौसोमपी।तिनौ ७१ पुत्रेणपशुभूतेनयाजकोनरकंयातित्वपाप्सः पापमाचरत्।जंतंहत्वासोमकायशतं
पुत्रान्देयथा ७६ अजिज्ञासतयपीक्षितवानउत्कृत्यापिस्वमांसानिदत्वावाप्याविलंवपुःशिविःकपोतमिवचत्रायेतशरणागतं ७४ नैपापिकानांमुख्येनपुक्तिोवबलीयसी।नतऽकृतिरिति

सौकन्यामपिचाख्यानंच्यवनोपत्रभार्गवःशर्य्यातियज्ञेनामसौकृतवान्सोमपीतिनौ ७१ नाभ्यांचयत्रसमुनिर्यौवनंप्रतियादितःमांधातृश्चाप्युपा
ख्यानंराज्ञोत्रैवप्रकीर्तितम्७२ जंतूपाख्यानमत्रैवयत्रपुत्रेणसोमकःपुत्रार्थमयजन्नृपालेभेपुत्रशतंवसः ७३ ततःश्येनकपोतीयमुपाख्या
नमनुत्तमं इंद्राग्नीयत्रधर्मश्चाप्यजिज्ञासंस्त्रिविंनृपं ७४ अष्टावक्रीयमत्रैवविवादोयत्रवंदिना अष्टावक्रस्यविप्रर्षेर्जनकस्याध्वरेभवत् ७५ नै
यापिकानांमुख्येनहृणास्यात्मजेनच पराजितोयत्रवंदीविवादेनमहात्मना ७६ विजित्यसागरंप्रासंपितरंलब्धवानृषिः यवक्रीतस्यचाख्या
नंरैभ्यस्यचमहात्मनः गंधमादनयात्राचवासोनारायणाश्रमे ७७ नियुक्तोभीमसेनश्चद्रौपद्यागंधमादने व्रजन्पथिमहावाहुर्दृष्टवान्पवना
त्मजं ७८ कदलीखंडमध्यस्थंहनूमंतंमहावलं यत्रसौगंधिकार्थेसौनलिनींतामधर्षयत् ७९ यत्रास्ययुद्धमभवत्सुमहद्राक्षसैःस
ह यक्षैश्चैवमहावीर्यैर्मणिमत्प्रमुखैस्तथा ८० ॥ ॥ ॥ ॥ ॥

मन्यमानेन ७६ सागरंप्राप्तंसागरंगतंपितरंकहोडंऋषिः अष्टावक्रः नवेद्यंयुक्तितोलभ्यंनचवेदोगुरुंविना। अष्टावक्रयवक्रीतयोर्धर्मोऽभ्यासेनदीरितं ७७ निर्गुणः परमात्मायंदेहंव्याप्या
वतिष्ठते। इत्युक्त्वाहंकपीन्द्राय नावमन्येतलंघये ७८ सौगंधिकार्थंकल्हारार्थं सौगंधिकंतुकल्हारंयत्पुराणेपिकर्तीणः इतिमेदिनी। नलिनींपुष्करिणीं। अधर्षयत्आकुलीकृतवान् ८०

३८५ ८६ राज्ञोग्रहतिशेषः तेनैवच्चार्जुनेनैवपौलोमानवानांवधच्चाख्यातः ८७ ८८ शारीराहूलनोष्वष्मान्तूलंवैधंमहन्नमंभीमस्यजगराग्रस्तं धर्मराजोत्थमोचयनयविनवत्स्याभोगःप
रिग्रहीतेयस्यताहेशंवर्धशरीरंयस्यतेनपर्वतेनतल्पेनेसर्थः ८९ ९० ९१ ममस्यायांसह्यौयवेशने ९२ ९३ यावत्कीर्तिरकीर्तिवीताच्चस्वर्गेकेथवाधुमानगर्तानिज्ञानोपादि

जटासुरस्यचवधोराक्षसस्यवृकोदरात वृषपर्वणश्चराजर्षेस्ततोभिगमनंस्मृतं ८१ आर्ष्टिषेणाश्रमेचैषांगमनंवासएवच प्रोत्साहनंचपांचाल्या
भीमस्यात्रमहात्मनः ८२ कैलासारोहणंप्रोक्तंयत्रयक्षैर्बलोत्कटैः युद्धमासीन्महाघोरंमणिमत्प्रमुखैः सह समागमश्चपांडूनांयत्रवैश्रवणेनच
समागमश्चार्जुनस्यतत्रैवभ्रातृभिः सह ८३ अवाप्यदिव्यान्यस्त्राणिगुर्वर्थंसव्यसाचिना निवातकवचैर्युद्धंहिरण्यपुरवासिभिः ८५
निवातकवचैर्घोरैर्दानवैः सुरशत्रुभिः पौलोमैः कालकेयैश्चयत्रयुद्धंकिरीटिनः ८६ वधश्चैषांसमाख्यातोराज्ञस्तेनैवधीमता अस्त्र
संदर्शनारंभोधर्मराजस्यसंनिधौ ८७ पार्थस्यप्रतिषेधश्चनारदेनसुरर्षिणा अवरोहणंपुनश्चैवपांडूनांगंधमादनात ८८ भीमस्यग्रह
णंचात्रपर्वताभोगवर्ष्मणा भुजगेंद्रेणबलिनातस्मिन्सुगहनेवने ८९ अमोक्षयद्यत्रचैनंप्रश्नानुक्त्वायुधिष्ठिरः काम्यकागमनंचैव ३२
पुनस्तेषांमहात्मनां ९० तत्रस्थांश्चपुनर्द्रष्टुंपांडवान्पुरुषर्षभान वासुदेवस्यागमनमत्रैवपरिकीर्तितं ९२ मार्कंडेयसमस्यायामुपा
ख्यानानिसर्वशः पृथोर्वैण्यस्ययत्रोक्तमाख्यानंपरमर्षिणा ९२ संवादश्चसरस्वत्यास्तार्क्ष्यर्षेः सुमहात्मनः मत्स्योपाख्यानमत्रैवप्रोच्य
तेतदनंतरं ९३ मार्कंडेयसमस्याचपुराणंपरिकीर्त्यते ऐंद्रद्युम्नमुपाख्यानंधौंधुमारंतथैवच ९४ ॥ ॥ ॥ छ

पित्रोः शुश्रूषया व्याधः सिद्धः परः पतिव्रताः सिद्ध्यति ब्राह्मणा वन्हेर्योगिनत्वा स्वसेव पायतिव्रतानां धर्मश्च द्रौपदी सत्यभामयोः संवाददर्धिगंतव्याः सेव्यास्तासां सुखावहाः ९५ ९६ सा
स्वतनिव्रजम् सुहिंस्वपमेवामिमस्यतेरनिसंदर्शयन्त्या हृषीकयात्रां महामुनिः नदेवब्राह्मणार्थे पिहिंसावह्नी प्रशस्यते इति संदर्शयन्त्याहमगस्त्यस्वप्ननिदर्शनं ९७ व्रीहिद्रौणिकहर्षातामृतं सुहृ
निश्चिप्रियः स्वसत्येनापिदानेन सिद्धातो सेजदीरितं ९८ दौर्वाससमेतसार्वात्म्यकाहरणं पचारितहरोः तत्रस्याहिजगत्प्रमसत्येनापि तत्स्यात ९९ भीमोमयंकारः भीमपांडवः पंच

पतिव्रतापाख्यानं तथैवांगिरसस्मृतं द्रौपद्याः कीर्तितश्चात्र संवादः सत्यभामया ९५ पुनर्द्वैतवनं चैव पाण्डवाः समुपागताः घोषयात्रा
च गांधर्वैर्यत्र बद्धः सुयोधनः ९६ ह्रियमाणस्तु मंदात्मा मोक्षितोसौ किरीटिना धर्मराजस्य चात्रैव मृगस्वप्ननिदर्शनम् ९७ काम्यके
काननश्रेष्ठे पुनर्गमनमुच्यते व्रीहिद्रौणिकमाख्यानमत्रैव बहुविस्तरं ९८ दुर्वाससोप्युपाख्यानमत्रैव परिकीर्तितं जयद्रथेनापहा
रो द्रौपद्याश्चाश्रमांतरात ९९ यत्रैनमन्वयाद्भीमो वायुवेगसमोजवे चक्रे चैनं पंचशिखं यत्र भीमो महाबलः २०० रामायणमुपा
ख्यानमत्रैव बहुविस्तरं यत्र रामेण विक्रम्य निहतो रावणो युधि १ सावित्र्याश्चाप्युपाख्यानमत्रैव परिकीर्तितं कर्णस्य परिमोक्षोत्र
कुंडलाभ्यां पुरंदरात २ ॥श्रीरामायनमः॥ ॥ ॥ ॥ छ

सत्यमिति पारे पितृस्वार्थः परस्त्रीस्पर्शमात्रेण जयद्रथदशास्ययोः आघः पंचसरोजातः सकुटुंबो हतः परः २०० कोयं श्रीमित्रमन्विच्छन् शंसः स्यान्महानपि । जद्यावत्तालिनंरमो
निर्दोषमपि साहसात् १ पतिव्रतायामाहात्म्यं कुलद्वयसुखावहं मर्त्यमप्युहांचैव सावित्री ह्यनिदर्शनं परिमोक्षो वियोगः २० २ ॥ छ ॥ छ ॥ छ ॥

आ०
३९

कर्णोदानायाच मिन्द्राद्देयं स्वात्मनः बंधनं । शक्त्या विनिमयात्क्रोध धर्मो नाम्नमवद्विषं । आरणेयं । अरणीहरणं धर्मेणानुगहत् विराटपर्व त्रयो दिनार्थो नाम्नप संहारवर्णनान्नारणो पेयधर्मयाथार्थ्यसंवादस्याजनतः कृतं ३ आदिरेकोनविंशस्यापर्वणिनवभिः सभा आरण्यकं षोडशभिर्धर्ममेवम्परपत ४ ५ ६ धर्मतत्त्वज्ञत्रिभिः सेवानि नियुद्धादिहेतुकं । शोकमोह फलं चार्थं विक्तिपर्वभिरष्टभि ७

यत्रास्य शान्तिंतस्येसा वदादेकवधाप्रच आरणेयमुपाख्यानं यत्र धर्मोऽन्वशासत ३ जग्मुर्लब्धवरा यत्र पाण्डवाः पश्चिमां दिशं एतदारणेयकं पर्वतृतीयं परिकीर्तितं ४ अत्राध्यायशतं हि तु संख्या पापरिकीर्तितं एकोनसप्ततिश्चैव तथाध्यायाः प्रकीर्तिताः ५ एकादश सहस्राणि श्लोकानां षट्शतानि च चतुः षष्टिस्तथा श्लोकाः पर्वण्यस्मिन्प्रकीर्तिताः ६ अतः परं निबोधेदं वैराटं पर्वविस्तरं । विराटनगरं गत्वा श्मशाने विपुलां शमीं ७ दृष्ट्वा संनिदधुस्तत्र पाण्डवा ह्यायुधान्युत यत्र प्रविश्य नगरं छद्मना न्यवसन्त ते पाञ्चालीं प्रार्थयानस्य कामोपहतचेतसः दुष्टात्मनो वधो यत्र कीचकस्य वृकोदरात् ८ पाण्डवान्वेषणार्थं च राज्ञो दुर्योधनस्य च चाराः प्रस्थापितास्तत्र निपुणाः सर्वतो दिशं १० न च प्रवृत्तिर्लब्धा पाण्डवानां महात्मनां गोग्रहश्च विराटस्य त्रिगर्तैः प्रथमं कृतः ११ यत्रास्य युद्धं सुमहत्तैरासील्लोमहर्षणं ह्रियमाणाश्च यत्रासौ भीमसेनेन मोक्षितः १२ गोधनं च विराटस्य मोक्षितं यत्र पाण्डवैः अनन्तरं च कुरुभिस्तस्य गोग्रहणं कृतं १३ ॥ ॥ ॥

ट विराटप्रथमं प्रोक्तः सेवाधर्मः प्रवेशने तत्रापि बल्लवाधार्जितस्त्वं कीचकदारणे ८ १० ११ १२ पौरुषं दर्शयित्वैव स्वामिनो गोग्रहनामनी । प्रकीर्तये दिशि प्रोचे निर्गोग्रहपर्वणि १३ रा०म०
३९

धर्मेणैवापरं नीतो परं सौभाग्यमक्रमे ... अभिमन्युर्विवाहाख्यपर्व रिपन ... स्वदर्शितं १५ २१ मंदात्मा स्वार्थनिभिन्नः दुर्मतिर्विक्षिप्तचित्तः एकस्य स महापोत्मीशः किं सैमकोरिभिः
:इति व ... भेऽर्जुनः कृष्णेन सैन्यं धार्त्तराष्ट्रवत २२ वैचित्रवीर्यस्य पांडवस्य पुरोधसः सकाशान्नवचः इंद्र विजयतां सर्वे पुरोहितप्रेषणे चिसंवस्य मादाय पत्र्याम्यपेत २६ संजयं प्रेषयामास

समस्ता पत्र पार्थेन निर्जिताः कुरवो युधि प्रसाद्य तं गोधनं च विक्रमेण किरीटिना २४ विराटेनोत्तरादत्ता स्नुषा यत्र किरीटिनः अभिमन्युं समुद्दिश्य सौ
भद्रमरिघातनं २५ चतुर्थमेतद्विपुलं वैराटं पर्व वर्णितं अत्रापि परिसंख्याता अध्यायाः परमर्षिणा २६ सप्तषष्टिरथो पूर्णाः श्लोकानामपि मे शृ
णु श्लोकानां द्वे सहस्रे तु श्लोकाः पंचाशदेव तु २७ उक्तानि वेदविदुषा पर्वण्यस्मिन्महर्षिणा उद्योगपर्व विज्ञेयं पंचमं शृण्वतः परं २८ उपप्लव्ये
निविष्टेषु पांडवेषु जिगीषया दुर्योधनोऽर्जुनश्चैव वासुदेवमुपस्थितौ १९ साहाय्यमस्मिन्समरे भवान्नौ कर्तुमर्हति इत्युक्ते वचने कृष्णो
यत्रोवाच महामतिः २० अयुध्यमानमात्मानं मंत्रिणं पुरुषर्षभौ अक्षौहिणीं वा सैन्यस्य कस्य किं वा ददाम्यहं २१ वव्रे दुर्योधनः सैन्यं मंदात्मा
यत्र दुर्मतिः अयुध्यमानं सचिवं वव्रे कृष्णं धनंजयः २२ मद्रराजं च राजानमायांतं पांडवान्प्रति उपहारैर्वंचयित्वा वर्त्मन्येव सुयोधनः २३ वरदं तं
वरं वव्रे साहाय्यं क्रियतां मम शल्यस्तस्मै प्रतिश्रुत्य जगामोद्दिश्य पांडवान २४ शांतिपूर्वं चाकथयद्यत्रेंद्रविजयं नृपः पुरोहितप्रेषणं च पांड
वैः कौरवान्प्रति २५ वैचित्रवीर्यस्य वचः समादाय पुरोधसः तथेंद्रविजयं चापि यानं चैव पुरोधसः २६ संजयं प्रेषयामास शमार्थी पांडवान्प्र
ति यत्र दूतं महाराजो धृतराष्ट्रः प्रतापवान २७ श्रुत्वा च पांडवान्सत्यं वासुदेवपुरोगमान प्रजागरः संप्रजज्ञे धृतराष्ट्रस्य चिंतया २८ ॥ ७

१४

नित्यन्नेरणसंबंधः भवेत्सहायवान्पूर्वं हिताज्ञा ... शतुमथार्थयेत । उद्योग संजय प्रेष्य पर्व भ्यामे नदीरितं २८ ॥श्रीरामायनमः॥ ॥श्रीरामायनमः॥ ॥श्रीरामनामतारकं॥ ॥

२९ शोकेलालस्याव्यासक्तिर्यस्यतयाभूतत्तापहरं आध्यात्मं श्रावितो पितायं नजहाविनिमावः ननिद्राप्राप्तायर्थी थीनचवद्धनिबोधितः इतिश्राज्ञागरेमानत्वज्ञानेचापिविशीर्णं ३० समितौसभायां एका त्मप्रएकचित्तत्वंवक्तालत्तापत्रकुत्रचित्प्रसंगेवासुदेवार्जुनयोर्गीवेशपौरैकात्म्यममेदमेवशान्तिसंजयःतनज्ञानंविनाराज्ञः शोकनरागसंभवानराजातमोर्म्यानत्वधिलोकपालयैवनमर्थीनिगृह्णातीति नास्यशोकोनश्यतीतिशास्त्रहृदयं ३१ संधिंत्वविरोधंनागोहस्तीनेनसमीपंत्तं हास्तिनापुरमित्यर्थः ३१ ३३ ३४ ३५ दुष्टस्यनिग्रहरूपं। योगेश्वरत्वेषैश्वर्यैः स्वयंवैश्वरूपंच

विदुरोपत्रवाक्यानिविचित्राणिशतानिच श्रावयामासराजानंधृतराष्ट्रंमनीषिणा २९ तथासनत्सुजातेनपुत्राध्यात्ममनुत्तमं मनस्तापान्वितोराजा श्रावितःशोकलालसः ३० सभातेराजसमितौसंजयोपत्रवाविभो ऐकात्म्यंवासुदेवस्यप्रोक्तंवानर्जुनस्यच ३१ यत्रकृष्णोदयायत्वंसंधिमिच्छ न्महामतिः स्वयमागिहस्तिमंकन्नृनगरंनागसाह्वयं ३२ प्रत्याख्यानंचकृष्णस्यराज्ञादुर्योधनेनवै शमार्थंयाचमानस्यपक्षयोरुभयोर्हितं ३३ दम्भो द्भवस्यचाख्यानमत्रैवपरिकीर्तितं वरान्वेषणमत्रैवमातलेश्चमहात्मनः ३४ महर्षेश्चापिचरितंकथितंगालवस्यच विदुलायाश्चपुत्रस्यप्रोक्तं चाप्यनुशासनं ३५ कर्णादुर्योधनादीनांदुष्टंविज्ञायमंत्रितं योगेश्वरत्वंकृष्णेनयत्रराज्ञांप्रदर्शितं ३६ रथमारोप्यकृष्णेनयत्र[illegible]कर्णो नुमंत्रितः उपायपूर्वंशौण्डीर्यात्प्रत्याख्यातश्चतेनसः ३७ आगम्यहास्तिनपुरादुपप्लव्यमरिंदमः पांडवानांयथावृत्तंसर्वमाख्यातवान्हरिः ३८

हरेःश्रुत्वावलोक्यदुर्योधनेनममेनेस्ववाक्यंमस्तिष्ठःश्रतोपि ३६ अनुमंत्रितःउपजापितःउपायपूर्वंभेदंशौण्डीर्यात्तगवात। अपित्रैलोक्याराज्यस्यहेतोर्विश्वस्तमाश्रितंनसजेदहंनाशेपीस ज्ञंकर्णोपजीवनः ॥ ३७ ३८ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥

निर्दसंतोपिमतोवैरालब्धनिकारःनिपधिश्रिमिवोलूकस्त्वेवादरायरणः ४१ यहूलाजुयमाशात्तेघातेरष्ट्रत्तमर्कत्नेप्याहार्द्दूरथरस्त्वेवैर्यमिलेज्जोवधेस्यामकिंचिन्नयशोमाध्यंयतोजन्मातरेविनापृत्स्वेशिरवंडिनी
घायेसंवोयाख्यानशीतम ४२ संधिविग्रहमिश्रितंकस्मद्दौसेनसंधिः उलूकदौसेनविग्रहः ताभ्यांमिश्रितं ४३ ४६ भ्रश्येसंतिविनासेनाकूर्म्मामलकमुश्विवत।इतिसेनापतिंभीष्मंचक्रेकौरवैंदनः वै
तं२

तेतस्यवचनंश्रुत्वामंत्रयित्वाचयद्धितं सांग्रामिकंततःसर्वेसज्जंचक्रुःपरंतपाः ३९ ततोयुद्धायनिर्यातानराश्वरथदंतिनःनगराद्बलिनयुराह्वसंख्या
नमेवच ४० यत्रराज्ञात्वुलूकस्यप्रेषणंपांडवान्प्रति श्योभाविनिमहायुद्धेदौसेनकृतवान्प्रभु ४१ रथातिरथसंख्यानमंवोयाख्यानमेवच एतत्सर्वकृष्टंतांतपंचमंप
र्वभारते ४२ उद्योगपर्वनिर्दिष्टंसंधिविग्रहमिश्रितं अध्यायानांशतंप्रोक्तंषडशीतिर्म्महर्षिणा ४३ श्लोकानांषट्सहस्राणितांवसेवशतानिव श्लोकाश्चनवतिः
प्रोक्तास्तथैवाष्टौमहात्मना ४४ व्यासेनोदारमतिनापर्वण्यस्मींतपोधनाः अतः परंविचित्रार्थंभीष्मपर्वप्रचक्षते ४५ जंबूखंडविनिर्माणंयत्रोक्तंसंजयेनह
यत्रयौधिष्ठिरंसैन्यंविषादमगमत्परं ४६ यत्रयुद्धमभूद्घोरंदशाहानिसुदारुणं कश्मलंयत्रपार्थस्यवासुदेवोमहामतिः ४७ मोहजंनाशयामासहेतुभिर्मोक्षद
र्शिभिः समीक्ष्याधोक्षजः क्षिप्रंयुधिष्ठिरहितेरतः ४८ ॥ ॥ ॥ ॥ ॥ ॥

राज्ञाद्दर्शनाहर्द्दूप्रव्रजस्याभेवेक्षणो।इतीवजंबूखंडादिगीतायाः एवमीरितं कश्मलंविषादं ४७ मोहजंममतोत्थं ४८ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७ ॥ ७

समीक्ष्य भीष्मस्तु दुर्जेयत्वमिति शेषः स्मृतिः स्मरेत्वेवत्तीमहात्मौत्वेतद्वियर्यः भीष्मंजिघांसतापार्थस्तैनैनसत्वदर्शितं ४९ नदेहमन्तरीयंतैवैस्मवाजितमस्तवः भीष्मः कालांतराकांक्षीशरतल्पेः वसत्वियं ५२
५४ स्मात्वद्य ऽयं महः स्मेश मितिमस्वासपोधनः तपाशपास्वमाचार्यसेनापतेम्पयेचपत ५५ संससकात्यपेसंख्येसर्वधाण्यनिवर्त्तिनस्ते। स्वपहृतवंत: राणाजिराद्वगास्थानातः ५६ ५८ सं

रथादाशुस्वेवेगेनस्वपंक्त्यमंडलावीः ततोदयागिरणावडीष्मंहतंसंयेनभीः ४९ वाक्यततोदामिहतोपत्रकस्मेनपांडवः गांडीवधन्वासमरेसर्वेशस्त्रभृतांवरः ५०
शिखंडिनंपुरस्कृत्यपत्रपार्थोमहाधनुः विनिघ्नन्निशितैर्वाणैरथाद्भीष्ममपातयत ५१ शरतल्पगतश्चैवभीष्मोयत्रबभूवह षष्ठमेतत्समाख्यातंभारतेपर्वविस्तरं ५२
अध्यायानांशतंप्रोक्त [illegible] नथासप्तदशापरे पंचश्लोकसहस्त्राणिसंख्ययाष्टौशतानिच ५३ श्लोकाश्चचतुराशीतिरस्मिन्पर्वणिकीर्त्तिताः व्यासेनवेदविदुषासंख्या
ताभीष्मपर्वणि ५४ द्रोणपर्वततश्चित्रंबहुवृत्तांतमुच्यते सेनापत्येभिषिक्तोथयत्राचार्यः प्रतापवान ५५ दुर्योधनस्यप्रीत्यर्थंप्रतिजज्ञेमहास्त्रवित् ग्रह
णंधर्मरा [illegible] जस्यपांडुपुत्रस्यधीमतः यत्रसंसप्तकाः पार्थमपनिन्यूरणाजिरात ५६ भगदत्तोमहाराजोयत्रशक्रसमोयुधि सुप्रतीकेननागेनसहिशांतःकि
रीटिना ५७ यत्राभिमन्युंबहवोजघ्नुरेकंमहारथाः जयद्रथमुखाबालंशूरमप्राप्तयौवनं ५८ हतेभिमन्यौक्रुद्धेनयत्रपार्थेनसंयुगे अक्षौहिणीः सप्तहत्वा
हतोराजाजयद्रथः ५९ भी [illegible] यत्रभीमोमहाबाहुः सात्यकिश्चमहारथः अन्वेषणार्थंपार्थस्ययुधिष्ठिरनयाज्ञया प्रविष्टौभारतींसेनामप्रधृष्यांसुरैरपि ६०

प
संसप्तकावशेषोत्साहीजिष्णुः उग्रवधार्दितः प्रविष्टांमहतींकतानीर्णाः श्रीपतिमायया ५९ ६० ॥ ६० ॥ ६० ॥ ६० ६० ॥ ६०

६१ सुतेनोप्यस्मभुत्तांपांनिपनिकूलेविधातारि द्रोणाख्यमर्दुकालेहि धर्म्मोप्यनपभागभतां ब्रूहते नेन हतो द्रोणोन सानारायणास्त्रकं। नामोपायैरीन्हत्वा त्वीपाना द्वितनवान्हरीः ६२ मिषतांपश्यतां ७० ७१
कार्यकार्यविचारंहि क्रोधाविष्टानकुर्वते। अपिवृष्णी रा तंभ्रातमीमसेनोहिसंयुगे ७२ सैरीरैद्धिंनिजघ्ने द्रोणिर्दानींतद्दिव्यमर्थ्यघः सहायोहंतरीशानः श्रीरामायनमः॥ श्रीकाशीविश्वेश्वरायनमः

[illegible]

ससंसक्तावशेषंचकृतंनिःशेषमाहवे अलंवुषःश्रुतायुश्च जलसंधश्चवीर्यवान ६१ सोमदत्तिर्विराटश्चद्रुपदश्चमहारथः घटोत्कचादयश्चान्येनिहता
द्रोणपर्वणि ६२ अश्वत्थामापिचात्रैवद्रोणेयुधिनिपातिते अस्त्रंप्रादुश्चकारोग्रंनारायणममर्षितः ६३ आग्नेयंकी[illegible]तेयत्ररुद्रमाहात्म्यमुत्तमं
व्यासस्यचाप्यागमनंमाहात्म्यंकृष्णपार्थयोः ६४ सप्तमंभारतेपर्वमहदेतदुदाहृतं यत्रतेपृथिवीपालाः प्रायशोनिधनंगताः ६५ द्रोणपर्वणि
येशूरानिर्दिष्टाःपुरुषर्षभाः अत्राध्यायशतंप्रोक्तंतथाध्यायाश्चसप्ततिः ६६ अष्टौश्लोकसहस्राणितथानवशतानिच श्लोकानवतथैवात्रसं
ख्यातानातत्वदर्शिना पाराशर्येणमुनिनासंचिंत्यद्रोणपर्वणि ६७ अतःपरंकर्णपर्वप्रोच्यतेपरमाद्भुतं सारथ्येविनियोगश्चमद्रराजस्यधीमतः ६८
आख्यातंयत्रपौराणंत्रिपुरस्यनिपातनं प्रयाणेपरुषश्चात्रसंवादः कर्णशल्ययोः हंसकाकीयमाख्यानंतत्रैवाक्षेपसंहितं ६९ वधःपांड्यस्य
चतथाअश्वत्थाम्नामहात्मनः दंडसेनस्यचवधोदंडस्यचवधस्तथा द्वैरथेयत्रकर्णेनधर्मराजोयुधिष्ठिरः संशयंगमितोयुद्धेमिषतांसर्वधन्विनां ७०
अन्योन्यंप्रतिचक्रोधोयुधिष्ठिरकिरीटिनोः यत्रैवानुनयःप्रोक्तोमाधवेनार्जुनस्यहि ७१ प्रतिज्ञापूर्वकंचापिवक्षोदुःशासनस्यच भित्वावृको
दरोरक्तंपीतवानत्रसंयुगे। ७२ द्वैरथेयत्रपार्थेनहतःकर्णोमहारथः अष्टमंपर्वनिर्दिष्टमेतद्भारतचिंतकैः ७३ ॥ ॥ ॥ ६

पक्षपातविवर्जितः ७३ श्रीरामायनमः श्रीकाशीश्वरायनमः श्रीकालभैरवायनमः। श्रीरामनामतारकं श्रीरामजीमहाराजः

७४ ७८ ज्ञधाशाजीविनाशाचसङ्कीर्णस्यापिदुरत्यजा। शल्यंह्रदं च शरणं कृतवान्सत्सुयोधनः ७९ ८० समवाये समये ८१ पुह्यं तेन तीर्थयात्रां परस्य तेवादरणमाः तेन जानीमहे हिंसाधर्मा

एकोनसप्ततिः प्रोक्तास्त्वध्यायाः कर्णपर्वणि चत्वार्येव सहस्राणि नव श्लोकशतानि च ७४ ततः षष्टिस्तथीलोकाः पर्वण्यस्मिन्प्रकीर्तिताः अतः परं वि
चित्रार्थं शल्यपर्व प्रकीर्तितं ७५ हतप्रवीरे सैन्ये तु नेता मद्रेश्वरोभवत्तत्र वृत्तानि रथयुद्धानि कीर्त्यन्ते यत्र भागशः ७६ विनाशः कुरुमुख्यानां शल्यपर्वणि कीर्त्यते
शल्यस्य निधनं चात्र धर्मराजान्महात्मनः ७७ शकुनेश्च वधोत्रैव सहदेवेन संयुगे सैन्ये च हतभूयिष्ठे किंचिच्छिष्टे सुयोधनः ७८ ह्रदं प्रविश्य यत्रासौ संस्तभ्या
पो व्यवस्थितः प्रवृत्तिस्तत्र चाख्याता यत्र भीमस्य लुब्धकैः ७९ क्षेपयुक्तैर्वचोभिश्च धर्मराजस्य धीमतः ह्रदात्समुत्थितो यत्र धार्तराष्ट्रो समर्षणः ८० भी
मेन गदया युद्धं यत्रासौ कृतवान्सह समवाये च युद्धस्य रामस्यागमनं स्मृतं ८१ सारस्वतानां तीर्थानां पुण्यता यत्र कीर्तिता गदायुद्धं च तुमुलमत्रैव परिकी
र्त्तितं ८२ दुर्योधनस्य राज्ञोथ यत्र भीमेन संयुगे ऊरू भग्नौ प्रसह्याजौ गदया भीमवेगया ८३ नवमं पर्व निर्दिष्टमेतदद्भुतमर्थवत् एकोनषष्टिरध्यायाः
पर्वण्यत्र प्रकीर्तिताः ८४ संख्याता बहुवृत्तान्ताः श्लोकसंख्यात्र कथ्यते त्रीणि श्लोकसहस्राणि द्वे शते विंशतिस्तथा ८५ मुनिना संप्रणीतानि
कौरवाणां यशोभृता अतः परं प्रवक्ष्यामि सौप्तिकं पर्व दारुणं॥ ८६ ८६ ८६ ८६ ॥ ॥ छ

पिदुरितप्रदा ८२ नाधर्मेणाविनाशत्र: शक्यो निर्जेतुमुल्वणः भीमसेनो ह्यधोनाभेः प्रजहार सुयोधनं ८३ ८४ ८५ ८६ ॥ ॥ ॥ ॥ ॥

८८ दंशनंकवचं ८९ ९४ विदुषांब्राह्मणास्यापिदेव्यास्याद्दारुणामतिः अश्वत्थामापियत्रसानामीश्रवणवधीदुषा ९५ ९६ ९७ युधविशतमर्दी

भग्नोरुंयत्रराजानंदुर्योधनममर्षणं अपयातेषुपार्थेषुत्रयस्तेभ्यायपूरथाः कृतवर्माकृपोद्रौणिः सायाह्नेरुधिरोक्षितं ८७ समेत्यददृशुर्भूमौपतितंर
णमूर्द्धनि प्रतिजज्ञेदृढक्रोधोद्रौणिर्यत्रमहारथः ८८ अहत्वासर्वपांचालान्धृष्टद्युम्नपुरोगमान। पाण्डवांश्चसहामात्यान्नविमोक्ष्यामिदंशनं ८९
यत्रैवमुक्त्वाराजानमपक्रम्यत्रयोरथाः सूर्यास्तमनवेलायामासेदुस्तेमहद्वनं ९० न्यग्रोधस्याथमहतोयत्राधस्ताद्व्यवस्थिताः ततःकाकान्बहून
रात्रौदृष्ट्वोलूकेनहिंसितान ९१ द्रौणिः क्रोधसमाविष्टः पितुर्वधमनुस्मरन पांचालानांप्रसुप्तानांवधंप्रतिमनोदधे ९२ गत्वाचशिविरद्वा
रिदुर्दर्शंतत्रराक्षसं घोररूपमपश्यत्सदिवमाहत्यधिष्ठितं ९३ तेनव्याघातमस्त्राणांक्रियमाणमवेक्ष्यच द्रौणिर्यत्रविरूपाक्षंरुद्रमाराध्यम
त्वरः ९४ प्रसुप्तान्निशिविश्वस्तान्धृष्टद्युम्नपुरोगमान पांचालान्सपरीवारान्द्रौपदेयांश्चसर्वशः कृतवर्मणाचसहितःकृपेणचनिजघ्निवा
न ९५ यत्रामुच्यन्तनेपार्थाः पंचकृष्णबलाश्रयान सात्यकिश्चमहेष्वासःशेषाश्चनिधनंगताः ९६ पांचालानांप्रसुप्तानांयत्रद्रोणसुताद्व
धः धृष्टद्युम्नस्यसूतेनपाण्डवेषुनिवेदितः ९७ द्रौपदीपुत्रशोकार्तापितृभ्रातृवधार्दिताकृतानशनसंकल्पायत्रभर्तॄनुपाविशत ९८ द्रौ
पदीवचनाद्यत्रभीमोभीमपराक्रमः प्रियंतस्याश्चिकीर्षन्वैगदामादायवीर्यवान अन्वधावत्संसंक्रुद्धोभारद्वाजंगुरोः सुतं ९९॥ ॥छ॥

नउपरूद्ववनी ९८ ९९॥ ॥छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

३० २ जितकाशिनः जयश्लाघिनः ३ ५ सौप्तिकैषीके आख्याने अत्र पर्वणि संबद्धे इत्यर्थः ६ ८ आयोधनं युद्धस्थानं ९ १० क्षत्रियाः क्षत्रियाप्रियः ११ १२ १३ श्रीराम

भीमसेनभयाद्यत्र दैवेनाभिप्रचोदितः अपांडवायेति रुषा द्रौणिरस्त्रमवासृजत् ३० मैवमित्यब्रवीत्कृष्णः शमयंस्तस्य तद्वचः यत्रास्त्रमस्त्रेण च तच्छमयामास फाल्गुनः २ द्रौणेश्च द्रोहबुद्धित्वं वीक्ष्य पापात्मनस्तदा द्रौणिद्वैपायनादीनां शापाश्चान्योन्यकारिताः ३ मणिं तथा समादाय द्रोणपुत्रान्महारथात् पांडवाः प्रददुर्हृष्टा द्रौपद्यै जितकाशिनः एतद्दशमं पर्व सौप्तिकं समुदाहृतं अष्टादशास्मिन्नध्यायाः पर्वण्युक्ता महात्मना ४ श्लोकानां कथितान्यत्र शतान्यष्टौ प्रसंख्यया श्लोकाश्च सप्ततिः प्रोक्ता मुनिना ब्रह्मवादिना ५ सौप्तिकैषीके संबद्धे पर्वण्युत्तमतेजसा अत ऊर्ध्वमिदं प्राहुः स्त्रीपर्व करुणोदयं ६ पुत्रशोकाभिसंतप्तः प्रज्ञाचक्षुर्नराधिपः कृष्णोपनीतां यत्रासावायसीं प्रतिमां दृढां भीमसेनद्रोहबुद्धिर्धृतराष्ट्रो बभंज ह ७ तथा शोकाभितप्तस्य धृतराष्ट्रस्य धीमतः संसारगहनं बुद्ध्या हेतुभिर्मोक्षदर्शिभिः ८ विदुरेण च यत्रास्य राज्ञ आश्वासनं कृतं धृतराष्ट्रस्य चात्रैव कौरवायोधनं तथा सांतःपुरस्य गमनं शोकार्त्तस्य प्रकीर्त्तितं ९ विलापो वीरपत्नीनां यत्रातिकरुणः स्मृतः क्रोधावेशः प्रमोहश्च गांधारीधृतराष्ट्रयोः १० यत्र तान्क्षत्रियाञ्शूरान्संग्रामेष्वनिवर्त्तिनः पुत्रान्भ्रातॄन्पितॄंश्चैव ददृशुर्निहतान्रणे ११ पुत्रपौत्रवधार्त्तायास्तथात्रैव प्रकीर्त्तिता गांधार्याश्चापि

नं२ कृष्णेन क्रोधोपशमनक्रिया १२ ॥ ॥ ॥ ॥ ॥ ॥ छ

श्रीकृष्णजयकृष्णजयकृष्ण॥ ॥श्रीरामनामतारकं॥ ॥श्रीरामायनमः॥ ॥श्रीकाशीविश्वेश्वरायनमः॥ ॥श्रीरामचंद्रायनमः॥

अर्थार्थी वधमाप्नोतिविलयंतिचतन्नृत्विपः तस्मादर्थनलिप्सेतश्रेयोर्थीधार्मिकस्सदा। हित्वाक्रोधहिंसालोभराज्यंयुधिष्ठिरः एवंभूतलक्ष[illegible]णोवभवत्यर्थः सतामपिवंधूनपितयेयुद्धे स्वर्गे
प्राहैस्वनर्पयेत। इत्येवंनिर्मलंज्ञात्वंकर्मोक्तंतोयकर्मणि १४ १७ अर्थासोस्त्रादियोगेवायत्तत्वंकामशब्दितं।नदायुःपांडवाः क्लेशोर्ल्पख्याराज्याः दृष्यगृहाः चतस्भिरंवृवैरत्मेकादशमितस्थमं

यत्रराजामहाप्राज्ञः सर्वधर्मभृतांवरः राज्ञांतानिशरीराणिदाहयामासशास्त्रतः २३ तोयकर्मणिचारब्धेराज्ञामुदकदानिके गूढोत्पन्नस्यचाख्या
नंकर्णस्यएयपात्मनः १४ सुतस्यैतदिहप्रोक्तंव्यासेनपरमर्षिणा एतदेकादशंपर्वशोकवैक्लव्यकारकं १५ प्रणीतंसज्जनमनोवैक्लव्याश्रुप्रव
र्तकं सप्तविंशतिरध्यायाः पर्वण्यस्मिन्प्रकीर्तिताः १६ श्लोकसप्तशतंचापिपंचसप्ततिसंयुता संख्ययाभारताख्यानप्रोक्तंव्यासेनधीमता १७ अतः
परंशांतिपर्वद्वादशंबुद्धिवर्द्धनं यत्रनिर्वेदमापन्नोधर्मराजोयुधिष्ठिरः घातयित्वापितृन्भ्रातृन्पुत्रान्संबंधिमातुलान् १८ शांतिपर्वणिधर्मा
श्चव्याख्याताः शारतल्पिकाः राजभिर्वेदितव्यायेसम्यक्चैवबुभुत्सुभिः १९ ॥ ॥ ॥ ॥ ॥ छ

पंचभिर्भीष्ममुखाभिर्द्रोणमेकेनसप्तदशं। चतुर्भिपंचभिः शल्यंसौप्तिकस्त्र्यभिधानिचपर्वभिर्दायिपंत्सर्थेशांत्यादिः कामदीपिका। निवेदंदुःखं २८ शारतल्पिकाः शरागएवतल्पोयस्यतेनभीष्मेणव्याख्याताइत्यर्थः २९

यथोक्तं देशपात्रव्यासनिर्मम क्रमप्रकृतौ मपरस्यैव नहुषः मापद्धर्मा निरूपिताः १ कालहेतुप्रदर्शिनः कालोदुर्भिक्षादिः हेतुः वैरोगादिस्तान् स्वदर्शिनः देशकालाद्यपेक्ष्यावर्तितव्यमित्यर्थः सर्वज्ञकार्याकार्यविभागज्ञत्वं २०
२३ प्रकृतिं स्वाभाविकीमवस्थां सर्वाधिकारिकामोक्षधर्माः सम्प्रदीरिताः तत्राधिकारसिद्ध्यर्थं दानधर्माः प्रकीर्तिताः २४ व्यवहार आचारः धर्मार्थीयः धर्मार्थयोर्हितः २५ सत्यसुहिंसानृशंस्यथा

आपद्धर्माश्च तत्रैव कालहेतुप्रदर्शिनः यान्श्रुत्वा पुरुषः सम्यक सर्वज्ञत्वमवाप्नुयात् २० मोक्षधर्माश्च कथिता विचित्रा बहुविस्तराः द्वादशं पर्व निर्दिष्टमेतत्प्राज्ञ
जनप्रियं २१ अत्र पर्वणि विज्ञेयमध्यायानां शतत्रयं त्रिंशच्चैव तथाध्याया नव चैव तपोधना २२ चतुर्दश सहस्राणि तथा सप्तशतानि च सप्तश्लोकास्तथैवा
त्र पंचविंशति संख्यया २३ अत ऊर्ध्वं च विज्ञेयमनुशासनमुत्तमं यत्र प्रकृतिमापन्नः श्रुत्वा धर्मविनिश्चयं भीष्मात्भागीरथीपुत्रात्कुरुराजो युधिष्ठि
रः २४ व्यवहारोत्र कार्त्स्न्येन धर्मार्थीयः प्रकीर्तितः विविधानां च दानानां फलयोगाः प्रकीर्तिताः २५ तथा पात्रविशेषाश्च दानानां च परो विधिः
आचारविधियोगश्च सत्यस्य च परागतिः २६ महाभाग्यं गवां चैव ब्राह्मणानां तथैव च रहस्यं चैव धर्माणां देशकालोपसंहितं २७ एतत्सुबहुवृत्तांत
मुत्तमं चानुशासनं भीष्मस्यैवं संप्राप्तिः स्वर्गस्य परिकीर्तिता २८

र्थमाषणस्य परागतिः परा काष्ठा २६ महाभाग्यमाहात्म्यं रहस्यं अल्पायासेनापि महाफलप्रदत्वं देशकालोपसंहितं तीर्थपर्वोपधानात् २७ स्वच्छंदमरणः सर्वो योगी भीष्मसमो भवत् इति प्रदर्शयन् भीष्मनिर्याणं चाथ वर्णयति २८

तै१

वाराणस्यामविज्ञातोवसेद्दिव्यमपर्वस्वधीः व्यासमैत्रेयसर्वादत्तसम्यक्प्रदर्शितं २९ काश्यांमतत्सकुराणपंशिवलिंगत्व मच्छमित्रपूर्वमिनत्संवर्त्तमरुत्तीयेप्रकाशितं ३० कममुक्तिप्रसिद्धार्थमश्वमेधोपिकीर्तितः तत्वम

इर्यहत्वाचपुनरध्यात्ममीरितं ३१ तसुराणश्चासिद्धंसंवर्त्तमरुत्तीयंचपर्यायंटने ३२ संशयंप्राणांतंगंगाशापमोक्षार्थंधनंजयोदर्शितः ३३ हयेनअश्वंनमसत्यमपिसर्जुने अश्वमेधाधिकंपुराणंततइत्याहनाकुले ३४

पाप१ पा८१

एतत्त्रयोदशंपर्वधर्म्मनिश्चयकारकं अध्यायानांशतंतत्रषट्चत्वारिंशदेवतु २९ श्लोकानांतुसहस्राणिप्रोक्तान्यष्टौप्रसंख्यया ततोश्वमेधिकंनामपर्व प्रोक्तंचतुर्दशं ३० तत्संवर्त्तमरुत्तीयंयत्राख्यानमनुत्तमं सुवर्णकोशसंप्राप्तिर्जन्मचोक्तंपरिक्षितः ३१ दग्धस्यास्त्राग्निनापूर्वंकृष्णात्संजीवनंपुनः ३१ चर्य्यायांहयमुत्सृष्टंपांडवस्यानुगच्छतः तत्रतत्रचयुद्धानिराजपुत्रैरमर्षणैः ३२ चित्रांगदायाःपुत्रेणपुत्रिकायाधनंजयः संग्रामेबभ्रुवाहेनसंशयंचात्रदर्शितं ३३ अश्वमेधेमहायज्ञेनकुलाख्यानमेवच इत्याश्वमेधिकंपर्वप्रोक्तमेतन्महाद्भुतं ३४ अध्यायानांशतंचैवत्रयोध्यायाश्चकीर्तिताः त्रीणिश्लोकसहस्राणितावंत्येवशतानिच विंशतिश्चतथाश्लोकास्संख्यातास्तत्वदर्शिना ३५ ततस्त्वाश्रमवासाख्यंपर्वपंचदशंस्मृतं यत्रराज्यंसमुत्सृज्यगांधार्य्यासहितोनृपः धृतराष्ट्रोश्रमपदंविदुरश्चजगामह ३६ यंदृष्ट्वाप्रस्थितंसाध्वीपृथाप्यनुययौतदा पुत्रराज्यंपरित्यज्यगुरुशुश्रूषणेरता ३७

३५ धृतराष्ट्रोश्रमपदमिसचत्र्याकारस्पृष्ट्वित्वमार्यं ३६ तपोहितत्वमंत्रणांभोगानरक्षयोनपः इतीवकुंतीपुत्राणांराज्यंसत्काननंययौ ३७ ॥ ॥ ॥ ॥एम

मायामात्रं घ्नतादीनि विज्ञायाश्चर्यपर्वतः शैलोद्भवस्यस्काशोकं मोक्षं समाश्रयेत ३९ संजयश्च स्वर्गतिं गतः स्मरन्नते ४० ४२ पंचश्लोकशतानि वेसत्रयं च श्लोकाश्च [illegible] श्लोकशतं चेति समासः पंचाविंशं शतमित्यर्थः ते
नात्र एकादशशतीह श्लोकसंख्या तेषां तावत्सा एव पु[illegible]रुकेश्वयलंभात ४३ ४४ आयाने घ्राणयानस्थाने पानकलिता घ्राणयानेन वशीकृताः ४५ एकान्ति ग्रंथितरां। रामहात्मो महतपरं ब्रह्मापि संतोकाप्त

यत्र राजा हतान्पुत्रान्पौत्रानन्यांश्च पार्थिवान् लोकांतरगतान्वीरानपश्यत्पुनरागतान् ३८ आश्चेः उसादाल्स्मस्पदृष्ट्वाश्चर्यमनुत्तमं त्यक्त्वा शोकं स
दारश्च सिद्धिं परामिकां गतः ३९ यत्र धर्मं समाश्रित्य विदुरः स्वगतिं गतः संजयश्च सहामात्यो विद्वान्पर्वलागार्दवशी ४० ददर्श नारदं यत्र धर्मराजो युधि
ष्ठिरः नारदाच्चैव शुश्राव वृष्णीनां कदनं महत ४१ एतदाश्रमवासाख्यं पर्वोक्तं समहद्भुतं द्विचत्वारिंशदध्यायाः पर्वैतदभिसंख्यया ४१ सहस्रमेकं श्लोकानांपंच ३
श्लोकशतानि च षडेव च तथा श्लोकाः संख्यातास्तत्त्वदर्शिना ४३ अतः परं निबोधेदं मौशलं पर्व दारुणं यत्र ते पुरुषव्याघ्राः शस्त्रस्पर्शमहा
हधि ब्रह्मदंडविनिष्पिष्टाः समीपे लवणांभसः ४४ आपाने पानकलिता दैवेनाभिप्रचोदिताः एरकारूपिभिर्वज्रैर्निजघ्नुरितरेतरं ४५ यत्र स
र्वक्षयं कृत्वा तावुभौ रामकेशवौ नातिचक्रमतः कालं प्राप्तं सर्वहरं महत ४६

नातिचक्रमतः समर्थावपि मर्यादां नोल्लंघितवंतावित्यर्थः ब्रह्मस्तोभात् घ्राणयानाद्विनष्टाः सर्वयादवाः तस्मादेतद्रूपं सद्भिर्नैव कार्यं एकदाचन ४६ ॥ ॥श्रीरामायनमः॥ ॥श्रीरामचंद्रायनमः॥ ॥

स्त्रा ञ्चिपींश ४७ वैशसंपरस्परं विशसनं ४८ ४९ सर्वेक्षयांतानिचयोहस्मीनामपिसंक्रयात्पराभवाद्र्जुनस्यपतनांतामनुत्तमाः ५० अन्नमल्लतांन्नस्त्रुणां ५१ सप्तमासंराजयोगं ५२ अध्यायाष्टौसंधिरा
षः ५३ महाप्रस्थानंदेहस्रागाधंत्रनुष्टिगमनं ५४ ५५ स्वम्ममसंविनिक्षिप्यपरंशोचेत कः पुमानायुधिष्ठिरश्चोपेक्षाकुर्यार्हं धोमुर्षतः ५६ ५७ शतंचत्रयंचेतिसमासेशतत्रयमिस्यसन्नधिकंशतमित्यर्थः
म्मु९

पश्चार्जुनोद्वारवतीमेत्यवृष्णिविनाकृतांदृष्ट्वाविषादमगमत्परंचार्जिनरर्षभः ४७ सतंसत्कृत्यनरश्रेष्ठंमातुलंशौरिमात्मनः ददर्शयदुवीराणामापाने
वैशसंमहत् ४८ शरीरंवासुदेवस्यरामस्यचमहात्मनः संस्कारंलंभयामासवृष्णीनांचप्रधानतः ४९ सवृद्धबालमादायद्वारवत्यास्ततोजनं ददर्शापदि
कष्टायांगांडीवस्यपराभवं ५० सर्वेषांचैवदिव्यानामस्त्राणामप्रसन्नतां नाशंवृष्णिकलत्राणांप्रभावानामनित्यतां ५१ दृष्ट्वानिर्वेदमापन्नोव्यास
वाक्यप्रचोदितः धर्म्मराजंसमासाद्यसंन्यासंसमरोचयत् ५२ इत्येतन्मौशलंपर्वषोडशंपरिकीर्तितं अध्यायाष्टौसमाख्याताः श्लोकानांचशतत्रयम्
५३ महाप्रस्थानिकंतस्मादूर्ध्वसप्तदशंस्मृतं यत्रराज्यंपरित्यज्यपांडवाः पुरुषर्षभाः ५४ द्रौपद्यासहितादेव्यामहाप्रस्थानमास्थिताः यत्रतेग्निंददृशि
रेलौहित्यंप्राप्यसागरं ५५ यत्राग्निनाचोदितश्चपार्थस्तस्मैमहात्मने ददौसंपूज्यतद्दिव्यंगांडीवंधनुरुत्तमं ५६ यत्रभ्रातृन्निपतितान्द्रौपदींच
युधिष्ठिरः दृष्ट्वाहित्वाजगामैवसर्वाननवलोकयन् ५७ एतत्सप्तदशंपर्वमहाप्रास्थानिकंस्मृतं यत्राध्यायास्त्रयः प्रोक्ताः श्लोकानांचशतत्रयं
विंशतिश्चतथाश्लोकाः संख्यातास्तत्वदर्शिना ५८

ततस्त्रयोविंशत्यधिकंशतंश्लोकाइत्यर्थः तावतामेवोपलंभात ५८ ॥ ॥ ॥ ॥ ॥ ॥७

आनृशंस्यात् कृतज्ञत्वात्। आनृशंस्यं परो धर्मो येन राजा युधिष्ठिरः श्वानं भक्तं न राजा युधिष्ठिरः श्वानं भक्तं विना देवरथं स्वर्गं च नारुरुहत् ५९ एवं सर्वत्र नास्य पर्यन्तं किं यातनामनुभूयते यतः न पश्यन्ति निवृत्तिं पापं विना वा
चः कृता यैता। अर्थो धर्माय भोगाय धर्मः स्वर्गाय मुक्तये। कामो धर्मार्थनाशाय मोक्षः स्वार्थस्त्रिवर्गजित् ६० स्वर्गमिति। राज्ञां तेन महतामपि यातना प्राप्तिः स्तीति दर्शितमिति भावः ६१ निदेशे पमस्पशा

स्वर्गपर्व ततो ज्ञेयं दिव्यं यत्तदमानुषं प्राप्तं दैवरथं स्वर्गान्नेष्टवान्यत्र धर्मराट् आरोढुं सुमहाप्राज्ञ आनृशंस्याच्छुना विना ५९ तामस्याविचलां ज्ञात्वा स्थितिं धर्मे महात्मनः श्वरूपं यत्र तत्त्यक्त्वा धर्मेणासौ समन्वितः ६० स्वर्गं प्राप्तः स च तथा यातना विपुला भृशं देवदूतेन नरकं यत्र व्याजेन दर्शितं ६१ शुश्राव यत्र धर्मात्मा भ्रातॄणां करुणा गिरः निदेशे वर्तमानानां देशे तत्रैव वर्ततां ६२ अनुदर्शितश्च धर्मेण देवराजेन पाण्डवः आप्लुत्याकाशगङ्गायां देहं त्यक्त्वा स मानुषं ६३ स्वधर्मनिर्जितं स्थानं स्वर्गे प्राप्य स धर्मराट् मुमुदे पूजितः सर्वैः सेन्द्रैः सुरगणैः सह ६४ एतदष्टादशं पर्व प्रोक्तं व्यासेन धीमता अध्यायाः पञ्च संख्याताः पर्वण्यस्मिन्महात्मना ६५ श्लोकानां द्वे शते चैव प्रसंख्याते तपोधनाः नव श्लोकास्तथैवान्ये संख्याताः परमर्षिणा ६६ ॥ ॥ ॥ ॥ ॥ ॥

सनेयातनायामित्यर्थः ६२ अनुदर्शितः ईश्वरफलं ऐश्वर्यपरत्वमस्तीति बोधितः ६३ ६४ ६५ ६६ ॥ ॥ ॥ ॥ ॥